# Dhvanyalokah Udyotah 3

# ધ્વન્યાલોકઃ ઉદ્યોતઃ ૩

## Document Information

Text title : Dhvanyaloka Udyota 3

File name : dhvanyaloka3.itx

Category : major_works

Location : doc_z_misc_major_works

Transliterated by : Rajani Arjun Shankar

Proofread by : Rajani Arjun Shankar

Latest update : January 4, 2002

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 7, 2024

*sanskritdocuments.org*

# ધ્વન્યાલોકઃ ઉદ્યોતઃ ૩

॥ તૃતીયઃ ઉદ્યોતઃ ॥

એવં વ્યઙ્ગ્યમુખેનૈવ ધ્વનેઃ પ્રદર્શિતે સપ્રભેદે સ્વરૂપે પુનર્વ્યઞ્જક-
મુખેનૈતત્પ્રકાશ્યતે —
અવિવક્ષિતવાચ્યસ્ય પદવાક્યપ્રકાશતા ।
તદન્યસ્યાનુરણનરૂપવ્યઙ્ગ્યસ્ય ચ ધ્વનેઃ ॥ ૧॥

અવિવક્ષિતવાચ્યસ્યાત્યન્તતિરસ્કૃતવાચ્યે પ્રભેદે પદપ્રકાશતા યથા મહર્ષેર્વ્યાસસ્ય –"સપ્તૈતાઃ સમિધઃ શ્રિયઃ" , યથા વા કાલિદાસસ્ય –"કઃ સન્નદ્ધે વિરહવિધુરાં ત્વય્યુપેક્ષેત જાયામ્" , યથા વા –"કિમિવ હિ મધુરાણાં મણ્ડનં નાકૃતીનામ્", એષૂદાહરણેષુ"સમિધ" ઇતિ"સન્નદ્ધ"ઇતિ "મધુરાણા"મિતિ ચ પદાનિ વ્યઞ્જકત્વાભિપ્રાયેણૈવ કૃતાનિ ।

તસ્યૈવાર્થાન્તરસઙ્ક્રમિતવાચ્યે યથા – રામેણ પ્રિયજીવિતેન તુ કૃતં પ્રેમ્ણઃ પ્રિયે નોચિતમ્"। અત્ર રામેણેત્યેતત્પદં સમસાહસૈકરસત્વાદિ-વ્યઙ્ગ્યાભિસઙ્ક્રમિતવાચ્યં વ્યઞ્જકમ્ ।

યથા વા —
એવમેવ જનસ્તસ્યા દદાતિ કપોલોપમાયાં શશિબિમ્બમ્ ।
પરમાર્થવિચારે પુનશ્ચન્દ્રશ્ચન્દ્ર ઇવ વરાકઃ ॥

અત્ર દ્વિતીયશ્ચન્દ્રશબ્દોऽર્થાન્તરસઙ્ક્રમિતવાચ્યઃ ।

અવિવક્ષિતવાચ્યસ્યાત્યન્તતિરસ્કૃતવાચ્યે પ્રભેદે વાક્યપ્રકાશતા યથા —

યા નિશા સર્વભૂતાનાં તસ્યાં જાગર્તિ સંયમી ।
યસ્યાં જાગ્રતિ ભૂતાનિ સા નિશા પશ્યતો મુનેઃ ॥

અનેન હિ વાક્યેન નિશાર્થો ન ચ જાગરણાર્થઃ કશ્ચિદ્વિવક્ષિતઃ । કિં તર્હિ ? તત્ત્વજ્ઞાનાવહિતત્વમતત્ત્વપરાઙ્મુખત્વં ચ મુનેઃ પ્રતિપાદ્યત ઇતિ તિરસ્કૃતવાચ્યસ્યાસ્ય વ્યઞ્જકત્વમ્ ।

તસ્યૈવાર્થાન્તરસઙ્ક્રમિતવાચ્યસ્ય વાક્યપ્રકાશતા યથા —

વિષમયિતઃ કેષામપિ કેષામપિ પ્રયાત્યમૃતનિર્માણઃ ।
કેષામપિ વિષામૃતમયઃ કેષામપ્યવિષામૃતઃ કાલઃ ॥

અત્ર હિ વાક્યે વિષામૃતશબ્દાભ્યાં દુઃખસુખરૂપસઙ્ક્રમિતવાચ્યાભ્યાં વ્યવહાર ઇત્યર્થાન્તરસઙ્ક્રમિતવાચ્યસ્ય વ્યઞ્જકત્વમ્ ।

વિવક્ષિતાભિધેયસ્યાનુરણનરૂપવ્યઙ્ગ્યસ્ય શબ્દશક્ત્યુદ્ભવે પ્રભેદે પદપ્રકાશતા યથા —

પ્રાતું ધનૈરર્થિજનસ્ય વાઞ્છાં દૈવેન સૃષ્ટો યદિ નામ નાસ્મિ ।
પથિ પ્રસન્નામ્બુધરસ્તડાગઃ કૂપોઽથવા કિં ન જડઃ કૃતોઽહમ્ ॥ ૧॥

અત્ર હિ જડ ઇતિ પદં નિર્વિણ્ણેન વક્ત્રાત્મસમાનાધિકરણતયા પ્રયુક્તમનુરણનરૂપતયા કૂપસમાનાધિકરણતાં સ્વશક્ત્યા પ્રતિપદ્યતે ।
તસ્યૈવ વાક્યપ્રકાશતા યથા હર્ષચરિતે સિંહનાદવાક્યેષુ –"વૃત્તેઽસ્મિન્મહાપ્રલયે ધરણીધારણાયાધુના ત્વં શેષઃ" ।
એતદ્ધિ વાક્યમનુરણનરૂપમર્થાન્તરં શબ્દશક્ત્યા સ્ફુટમેવ પ્રકાશયતિ ।

અસ્યૈવ કવિપ્રૌઢોક્તિમાત્રનિષ્પન્નશરીરસ્યાર્થશક્ત્યુદ્ભવે પ્રભેદે પદ-પ્રકાશતયા યથા હરિવિજયે —

ચૂતાઙ્કુરાવતંસં ક્ષણપ્રસરમહાર્ઘમનોહરસુરામોદમ્ ।
અસમર્પિતમપિ ગૃહીતં કુસુમશરેણ મધુમાસલક્ષ્મીમુખમ્ ॥

અત્ર હ્યસમર્પિતમપિ કુસુમશરેણ મધુમાસલક્ષ્મ્યા મુખં ગૃહીતમિત્ય-સમર્પિતમપીત્યેતદવસ્થાભિધાયિપદમર્થશક્ત્યા કુસુમ્મશરસ્ય બલાત્કારં પ્રકાશયતિ ।

અત્રૈવ પ્રભેદે વાક્યપ્રકાશતા યથોદાહૃતં પ્રાક્"સજ્જયતિ સુરભિમાસો" ઇત્યાદિ । અત્ર સજ્જયતિ સુરભિમાસો ન તાવદર્પયત્યનઙ્ગાય શરાનિત્યયં વાક્યાર્થઃ કવિપ્રૌઢોક્તિમાત્રનિષ્પન્નશરીરો મન્મથોન્માથકદનાવસ્થાં વસન્તસમયસ્ય સૂચયતિ ।

સ્વતઃસમ્ભવિશરીરાર્થશક્ત્યુદ્ભવે પ્રભેદે પદપ્રકાશતા યથા —
વાણિજક હસ્તિદન્તાઃ કુતોઽસ્માકં વ્યાઘ્રકૃત્તયશ્ચ ।
યાવલ્લુલિતાલકમુખી ગૃહે પરિષ્વક્કતે સ્નુષા ॥

અત્ર લુલિતાલકમુખીત્યેતત્પદં વ્યાધવધ્વાઃ સ્વતઃસમ્ભાવિતશરીરાર્થશક્ત્યા સુરતક્રીડાસક્તિં સૂચયંસ્તદીયસ્ય ભર્તુઃ સતતસમ્ભોગક્ષામતાં પ્રકાશયતિ ।

તસ્યૈવ વાક્યપ્રકાશતા યથા —
શિખિપિચ્છકર્ણપૂરા જાયા વ્યાધસ્ય ગર્વિણી ભ્રમતિ ।
મુક્તાફલરચિતપ્રસાધનાનાં મધ્યે સપત્નીનામ્ ॥

અનેનાપિ વાક્યેન વ્યાધવધ્વાઃ શિખિપિચ્છિકર્ણપૂરાયા નવપરિણીતાયાઃ કસ્યાશ્ચિત્સૌભાગ્યાતિશયઃ પ્રકાશ્યતે । તત્સમ્ભોગૈકરતો મયૂરમાત્રમારણસમર્થઃ પતિર્જાત ઇત્યર્થપ્રકાશનાત્ તદન્યાસાં ચિરપરિણીતાનાં મુક્તાફલરચિતપ્રસાધનાનાં દૌર્ભાગ્યાતિશયઃ ખ્યાપ્યતે । તત્સસમ્ભોગકાલે સ એવ વ્યાધઃ કરિવરવધવ્યાપારસમર્થ આસીદિત્યર્થપ્રકાશનાત્ ।

નનુ ધ્વનિઃ કાવ્યવિશેષ ઇત્યુક્તં તત્કથં તસ્ય પદપ્રકાશતા ।
કાવ્યવિશેષો હિ વિશિષ્ટાર્થપ્રતિપત્તિહેતુઃ શબ્દસન્દર્ભવિશેષઃ । તદ્ભાવશ્ચ પદપ્રકાશત્વે નોપપદ્યતે । પદાનાં સ્મારકત્વેનાવાચકત્વાત્ । ઉચ્યતે —
સ્યાદેષ દોષઃ યદિ વાચકત્વં પ્રયોજકં ધ્વનિવ્યવહારે સ્યાત્ । ન ત્વેવમ્ ; તસ્ય વ્યઞ્જકત્વેન વ્યવસ્થાનાત્ । કિં ચ કાવ્યાનાં શરીરાણામિવ સંસ્થાનવિશેષાવચ્છિન્નસમુદાયસાધ્યાપિ ચારુત્વપ્રતીતિરન્વયવ્યતિરેકાભ્યાં ભાગેષુ કલ્પ્યત ઇતિ પદાનામપિ વ્યઞ્જકત્વમુખેન વ્યવસ્થિતો ધ્વનિવ્યવહારો ન વિરોધી ।
“અનિષ્ટસ્ય શ્રુતિર્યદ્વદાપાદયતિ દુષ્ટતામ્ ।
શ્રુતિદુષ્ટાદિષુ વ્યક્તં તદ્વદિષ્ટસ્મૃતિર્ગુણમ્ ॥

પદાનાં સ્મારકત્વેઽપિ પદમાત્રાવભાસિનઃ ।
તેન ધ્વનેઃ પ્રભેદેષુ સર્વેષ્વેવાસ્તિ રમ્યતા ॥

વિચ્છિત્તિશોભિનૈકેન ભૂષણેનેવ કામિની ।
પદદ્યોત્યેન સુકવેર્ધ્વનિના ભાતિ ભારતી ॥”
ઇતિ પરિકરશ્લોકાઃ ॥ ૧॥

યસ્ત્વલક્ષ્યક્રમવ્યઙ્ગ્યો ધ્વનિર્વર્ણપદાદિષુ ।
વાક્યે સઙ્ઘટનાયાં ચ સ પ્રબન્ધેઽપિ દીપ્યતે ॥ ૨॥

તત્ર વર્ણાનામનર્થકત્વાદ્દ્યોતકત્વમસમ્ભવીત્યાશઙ્ક્યેદમુચ્યતે —

શષૌ સરેફસંયોગો ઢકારશ્ચાપિ ભૂયસા ।
વિરોધિનઃ સ્યુઃ શૃઙ્ગારે તે ન વર્ણા રસચ્યુતઃ ॥ ૩॥

ત એવ તુ નિવેશ્યન્તે બીભત્સાદૌ રસે યદા ।
તદા તં દીપયન્ત્યેવ તે ન વર્ણા રસચ્યુતઃ ॥ ૪॥

શ્લોકદ્વયેનાન્વયવ્યતિરેકાભ્યાં વર્ણાનાં દ્યોતકત્વં દર્શિતં ભવતિ ।

પદે ચાલક્ષ્યક્રમવ્યઙ્ગ્યસ્ય દ્યોતનં યથા —

ઉત્કમ્પિની ભયપરિસ્ખલિતાંશુકાન્તા
તે લોચને પ્રતિદિશં વિધુરે ક્ષિપન્તી ।
ક્રૂરેણ દારુણતયા સહસૈવ દગ્ધા
ધૂમાન્ધિતેન દહનેન ન વીક્ષિતાસિ ॥

અત્ર હિ તે ઇત્યેતત્પદં રસમયત્વેન સ્ફુટમેવાવભાસતે સહૃદયાનામ્ ।

પદાવયવેન દ્યોતનં યથા —
વ્રીડાયોગાન્નતવદનયા સન્નિધાને ગુરૂણાં
બદ્ધોત્કમ્પં કુચકલશયોર્મન્યુમન્તર્નિગૃહ્ય ।
તિષ્ઠેત્યુક્તં કિમિવ ન તયા યત્સમુત્સૃજ્ય બાષ્પં
મય્યાસક્તશ્ચકિતહરિણીહારિનેત્રત્રિભાગઃ ॥

ઇત્યત્ર ત્રિભાગશબ્દઃ ।

વાક્યરૂપશ્ચાલક્ષ્યક્રમવ્યઙ્ગ્યો ધ્વનિઃ શુદ્ધોઽલઙ્કારસઙ્કીર્ણશ્ચેતિ દ્વિધા મતઃ । તત્ર શુદ્ધસ્યોદાહરણં યથા રામાભ્યુદયે —"કૃતક-કુપિતૈઃ" ઇત્યાદિ શ્લોકઃ । એતદ્ધિ વાક્યં પરસ્પરાનુરાગં પરિપોષ-પ્રાપ્તં પ્રદર્શયત્સર્વત એવ પરં રસતત્ત્વં પ્રકાશયતિ ।

અલઙ્કારાન્તરસઙ્કીર્ણો યથા —"સ્મરનવનદીપૂરેણોઢાઃ" ઇત્યાદિશ્લો-કઃ । અત્ર હિ રૂપકેણ યથોક્તવ્યઞ્જકલક્ષણાનુગતેન પ્રસાધિતો રસઃ સુતરામભિવ્યજ્યતે ॥ ૩-૪॥

અલક્ષ્યક્રમવ્યઙ્ગ્યઃ સઙ્ઘટનાયાં ભાસતે ધ્વનિરિત્યુક્તં તત્ર સઙ્ઘટના-સ્વરૂપમેવ તાવન્નિરૂપ્યતે —

અસમાસા સમાસેન મધ્યમેન ચ ભૂષિતા ।
તથા દીર્ઘસમાસેતિ ત્રિધા સઙ્ઘટનોદિતા ॥ ૫॥

કૈશ્ચિત્ — તાં કેવલમનૂદ્યેદમુચ્યતે —
ગુણાનાશ્રિત્ય તિષ્ઠન્તી માધુર્યાદીન્વ્યનક્તિ સા ।
રસાન્ —
સા સઙ્ઘટના રસાદીન્ વ્યનક્તિ ગુણાનાશ્રિત્ય તિષ્ઠન્તીતિ । અત્ર ચ વિકલ્પ્યમ્ ગુણાનાં સઙ્ઘટનાયાશ્ચૈક્યં વ્યતિરેકો વા । વ્યતિરેકેઽપિ દ્વયી ગતિઃ । ગુણાશ્રયા સઙ્ઘટના , સઙ્ઘટનાશ્રયા વા ગુણા ઇતિ । તત્રૈક્યપક્ષે સઙ્ઘટનાશ્રયગુણપક્ષે ચ ગુણાનાત્મભૂતાનાધેયભૂતાન્વાશ્રિત્ય તિષ્ઠન્તી સઙ્ઘટના રસાદીન્ વ્યનક્તીત્યયમર્થઃ । યદા તુ નાનાત્વપક્ષે ગુણાશ્રયસઙ્ઘટનાપક્ષઃ તદા ગુણાનાશ્રિત્ય તિષ્ઠન્તી ગુણપરતન્ત્રસ્વભાવા ન તુ ગુણરૂપૈવેત્યર્થઃ । કિં પુનરેવં વિકલ્પનસ્ય પ્રયોજનમિતિ ?

અભિધીયતે — યદિ ગુણાઃ સઙ્ઘટના ચેત્યેકં તત્ત્વં સઙ્ઘટનાશ્રયા વા ગુણાઃ , તદા સઙ્ઘટનાયા ઇવ ગુણાનામનિયતવિષયત્વપ્રસઙ્ગઃ । ગુણાનાં હિ માધુર્યપ્રસાદપ્રકર્ષઃ કરુણવિપ્રલમ્ભશૃઙ્ગારવિષય એવ । રૌદ્રાદ્ભુતાદિવિષયમોજઃ । માધુર્યપ્રસાદૌ રસભાવતદાભાસવિષયાવેવેતિ વિષયનિયમો વ્યવસ્થિતઃ , સઙ્ઘટનાયાસ્તુ સ વિઘટતે । તથા હિ શૃઙ્ગારેઽપિ દીર્ઘસમાસા દૃશ્યતે રૌદ્રાદિષ્વસમાસા ચેતિ ।

તત્ર શૃઙ્ગારે દીર્ઘસમાસા યથા —“મન્દારકુસુમરેણુપિઞ્જરિતાલકા” ઇતિ। યથા વા —

અનવરતનયનજલલવનિપતનપરિમુષિતપત્રલેખં તે ।
કરતલનિષણ્ણમબલે વદનમિદં કં ન તાપયતિ ॥

ઇત્યાદૌ । તથા રૌદ્રાદિષ્વપ્યસમાસા દૃશ્યતે। યથા –“યો યઃ શસ્ત્રં બિભર્તિ સ્વભુજગુરુમદઃ”ઇત્યાદૌ । તસ્માન્ન સઙ્ઘટનાસ્વરૂપાઃ , ન ચ સઙ્ઘટનાશ્રયા ગુણાઃ ।

નનુ યદિ સઙ્ઘટના ગુણાનાં નાશ્રયસ્તત્કિમાલમ્બના એતે પરિકલ્પ્યન્તામ્ । ઉચ્યતે — પ્રતિપાદિતમેવૈષામાલમ્બનમ્ ।

તમર્થમવલમ્બન્તે યેઽઙ્ગિનં તે ગુણાઃ સ્મૃતાઃ ।
અઙ્ગાશ્રિતાસ્ત્વલઙ્કારા મન્તવ્યાઃ કટકાદિવત્ ॥ ઇતિ ।

અથવા ભવન્તુ શબ્દાશ્રયા એવ ગુણાઃ , ન ચૈષામનુપ્રાસાદિતુલ્યત્વમ્ । યસ્માદનુપ્રાસાદયોઽનપેક્ષિતાર્થશબ્દધર્મા એવ પ્રતિપાદિતાઃ । ગુણાસ્તુ વ્યઙ્ગ્યવિશેષાવભાસિવાચ્યપ્રતિપાદનસમર્થશબ્દધર્મા એવ ।

શબ્દધર્મત્વં ચૈષામન્યાશ્રયત્વેऽપિ શરીરાશ્રયત્વમિવ શૌર્યાદીનામ્ ।

નનુ યદિ શબ્દાશ્રયા ગુણાસ્તત્સઙ્ઘટનારૂપત્વં તદાશ્રયત્વં વા તેષાં પ્રાપ્તમેવ । ન હ્યસઙ્ઘટિતાઃ શબ્દા અર્થવિશેષપ્રતિપાદ્યરસાદ્યાશ્રિતાનાં ગુણાનામવાચકત્વાદાશ્રયા ભવન્તિ । નૈવમ્ ; વર્ણપદવ્યઙ્ગ્યત્વસ્ય રસાદીનાં પ્રતિપાદિતત્વાત્ ।

અભ્યુપગતે વા વાક્યવ્યઙ્ગ્યત્વે રસાદીનાં ન નિયતા કાચિત્સ-ઙ્ઘટના તેષામાશ્રયત્વં પ્રતિપદ્યત ઇત્યનિયતસઙ્ઘટનાઃ શબ્દા એવ ગુણાનાં વ્યઙ્ગ્યવિશેષાનુગતા આશ્રયાઃ । નનુ માધુર્યે યદિ નામૈવમુચ્યતે તદુચ્ય-તામ્ ; ઓજસઃ પુનઃ કથમનિયતસઙ્ઘટનશબ્દાશ્રયત્વમ્ । ન હ્યસમાસા સઙ્ઘટના કદાચિદોજસ આશ્રયતાં પ્રતિપદ્યતે। ઉચ્યતે — યદિ ન પ્રસિ-દ્ધિમાત્રગ્રહદૂષિતં ચેતસ્તદત્રાપિ ન ન બ્રૂમઃ । ઓજસઃ કથમસમાસા સઙ્ઘટના નાશ્રયઃ । યતો રૌદ્રાદીન્ હિ પ્રકાશયતઃ કાવ્યસ્ય દીપ્તિરોજ ઇતિ પ્રાક્પ્રતિપાદિતમ્ । તચ્ચૌજો યદ્યસમાસાયામપિ સઙ્ઘટનાયાં સ્યા-ત્તત્કો દોષો ભવેત્ । ન ચાચારુત્વં સહૃદયહૃદયસંવેદ્યમસ્તિ । તસ્માદનિ-યતસઙ્ઘટનશબ્દાશ્રયત્વે ગુણાનાં ન કાચિત્ક્ષતિઃ । તેષાં તુ ચક્ષુરાદી-નામિવ યથાસ્વં વિષયનિયમિતસ્ય સ્વરૂપસ્ય ન કદાચિદ્વ્યભિચારઃ ।

યત્તૂક્તમ્ —"સઙ્ઘટનાવદ્ગુણાનામપ્યનિયતવિષયત્વં પ્રાપ્નોતિ । લક્ષ્યે વ્યભિચારદર્શનાત્"ઇતિ । તત્રાપ્યેતદુચ્યતે - યત્ર લક્ષ્યે પરિકલ્પિત-વિષયવ્યભિચારસ્તદ્વિરૂપમેવાસ્તુ । કથમચારુત્વં તાદૃશે વિષયે સહૃદયાનાં નાવભાતીતિ ચેત્ ? કવિશક્તિતિરોહિતત્વાત્ । દ્વિવિધો હિ દોષઃ – કવેરવ્યુત્પત્તિકૃતોऽશક્તિકૃતશ્ચ । તત્રાવ્યુત્પત્તિકૃતો દોષઃ શક્તિતિર-સ્કૃતત્વાત્ કદાચિન્ન લક્ષ્યતે । યસ્ત્વશક્તિકૃતો દોષઃ સ ઝટિતિ પ્રતીયતે । પરિકરશ્લોકશ્ચાત્ર —

"અવ્યુત્પત્તિકૃતો દોષઃ શક્ત્યા સંવ્રિયતે કવેઃ ।
યસ્ત્વશક્તિકૃતસ્તસ્ય સ ઝટિત્યવભાસતે ॥"

તથા હિ — મહાકવીનામપ્યુત્તમદેવતાવિષયપ્રસિદ્ધસમ્ભોગશૃઙ્ગારનિબ-ન્ધનાદ્યનૌચિત્યં શક્તિતિરસ્કૃતત્વાત્ ગ્રામ્યત્વેન ન પ્રતિભાસતે । યથા કુમારસમ્ભવે દેવીસમ્ભોગવર્ણનમ્ । એવમાદૌ ચ વિષયે યથૌચિત્યા-ત્યાગસ્તથા દર્શિતમેવાગ્રે । શક્તિકૃતત્વં ચાન્વયવ્યતિરેકાભ્યામવ-સીયતે । તથા હિ શક્તિરહિતેન કવિના એવંવિધે વિષયે શૃઙ્ગાર ઉપનિ-

બધ્યમાનઃ સ્ફુટમેવ દોષત્વેન પ્રતિભાસતે । નન્વસ્મિન્ પક્ષે“યો યઃ શસ્ત્રં બિભર્તિ”ઇત્યાદૌ કિમચારુત્વમ્ ? અપ્રતીયમાનમેવારોપયામઃ । તસ્માદ્ ગુણવ્યતિરિક્તત્વે ગુણરૂપત્વે ચ સઙ્ઘટનાયા અન્યઃ કશ્ચિન્નિયમહેતુર્વક્તવ્ય ઇત્યુચ્યતે ।

— તન્નિયમે હેતુરૌચિત્યં વક્તૃવાચ્યયોઃ ॥ ૬॥

તત્ર વક્તા કવિઃ કવિનિબદ્ધો વા, કવિનિબદ્ધશ્ચાપિ રસભાવરહિતો રસભાવસમન્વિતો વા , રસોઽપિ કથાનાયકાશ્રયસ્તદ્વિપક્ષાશ્રયો વા, કથાનાયકશ્ચ ધીરોદાત્તાદિભેદભિન્નઃ પૂર્વસ્તદનન્તરો વેતિ વિકલ્પાઃ । વાચ્યં ચ ધ્વન્યાત્મરસાઙ્ગં રસાભાસાઙ્ગં વા, અભિનેયાર્થમનભિનેયાર્થં વા, ઉત્તમપ્રકૃત્યાશ્રયં તદિતરાશ્રયં વેતિ બહુપ્રકારમ્ । તત્ર યદા કવિરપગત-રસભાવો વક્તા તદા રચનાયાઃ કામચારઃ । યદાપિ કવિનિબદ્ધો વક્તા રસભાવરહિતસ્તદા સ એવ; યદા તુ કવિઃ કવિનિબદ્ધો વા વક્તા રસ-ભાવસમન્વિતો રસશ્ચ પ્રધાનાશ્રિતત્વાદ્ ધ્વન્યાત્મભૂતસ્તદા નિયમેનૈવ તત્રાસમાસામધ્યસમાસે એવ સઙ્ઘટને । કરુણવિપ્રલમ્ભશ‌ૃઙ્ગારયોસ્ત્વ-સમાસૈવ સઙ્ઘટના । કથમિતિ ચેત્ ; ઉચ્યતે — રસો યદા પ્રાધાન્યેન પ્રતિપાદ્યસ્તદા તત્પ્રતીતૌ વ્યવધાયકા વિરોધિનશ્ચ સર્વાત્મનૈવ પરિ-હાર્યાઃ । એવં ચ દીર્ઘસમાસા સઙ્ઘટના સમાસાનામનેકપ્રકારસમ્ભાવનયા કદાચિદ્રસપ્રતીતિં વ્યવદધાતીતિ તસ્યાં નાત્યન્તમભિનિવેશઃ શોભતે । વિશેષતોઽભિનેયાર્થે કાવ્યે, તતોઽન્યત્ર ચ વિશેષતઃ કરુણવિપ્રલમ્ભશ‌ૃઙ્ગા-રયોઃ । તયોર્હિ સુકુમારતરત્વાત્ સ્વલ્પાયામપ્યસ્વચ્છતાયાં શબ્દાર્થયોઃ પ્રતીતિર્મન્થરીભવતિ । રસાન્તરે પુનઃ પ્રતિપાદ્યે રૌદ્રાદૌ મધ્યમસમાસા સઙ્ઘટના કદાચિદ્ધીરોદ્ધતનાયકસમ્બન્ધવ્યાપારેણ દીર્ઘસમાસાપિ વા તદાક્ષેપાવિનાભાવિરસોચિતવાચ્યાપેક્ષયા ન વિગુણા ભવતીતિ સાપિ નાત્યન્તં પરિહાર્યા । સર્વાસુ ચ સઙ્ઘટનાસુ પ્રસાદાખ્યો ગુણો વ્યાપી । સ હિ સર્વરસસાધારણઃ સર્વસઙ્ઘટનાસાધારણશ્ચેત્યુક્તમ્ । પ્રસાદાતિક્રમે હ્યસ-માસાપિ સઙ્ઘટના કરુણવિપ્રલમ્ભશ‌ૃઙ્ગારૌ ન વ્યનક્તિ । તદપરિત્યાગે ચ મધ્યમસમાસાપિ ન ન પ્રકાશયતિ । તસ્માત્સર્વત્ર પ્રસાદોઽનુસર્તવ્યઃ । અત એવ ચ“યો યઃ શસ્ત્રં બિભર્તિ”ઇત્યાદૌ યદ્યોજસઃ સ્થિતિર્નેષ્યતે તત્પ્રસાદાખ્ય એવ ગુણો ન માધુર્યમ્ । ન ચાચારુત્વમ્ ; અભિપ્રેતરસ-પ્રકાશનાત્ । તસ્માદ્ગુણાવ્યતિરિક્તત્વે ગુણવ્યતિરિક્તત્વે વા સઙ્ઘટનાયા યથોક્તાદૌચિત્યાદ્વિષયનિયમોઽસ્તીતિ તસ્યા અપિ રસવ્યઞ્જકત્વમ્ ।

તસ્યાશ્ચ રસાભિવ્યક્તિનિમિત્તભૂતાયા યોઽયમનન્તરોક્તો નિયમહેતુઃ સ એવ ગુણાનાં નિયતો વિષય ઇતિ ગુણાશ્રયેણ વ્યવસ્થાનમપ્યવિરુદ્ધમ્ ।
વિષયાશ્રયમપ્યન્યદૌચિત્યં તાં નિયચ્છતિ ।
કાવ્યપ્રભેદાશ્રયતઃ સ્થિતા ભેદવતી હિ સા ॥ ૭॥

વક્તૃવાચ્યગતૌચિત્યે સત્યપિ વિષયાશ્રયમન્યદૌચિત્યં સઙ્ઘટનાં નિયચ્છતિ। યતઃ કાવ્યસ્ય પ્રભેદા મુક્તકં સંસ્કૃતપ્રાકૃતાપભ્રંશ-નિબદ્ધમ્ । સન્દાનિતકવિશેષકકલાપકકુલકાનિ । પર્યાયબન્ધઃ પરિકથા ખણ્ડકથા-સકલકથે સર્ગબન્ધોઽભિનેયાર્થમાખ્યાયિકા-કથે ઇત્યેવમાદયઃ । તદાશ્રયેણાપિ સઙ્ઘટના વિશેષવતી ભવતિ । તત્ર મુક્ત-કેષુ રસબન્ધાભિનિવેશિનઃ કવેસ્તદાશ્રયમૌચિત્યમ્ । તચ્ચ દર્શિતમેવ । અન્યત્ર કામચારઃ ।

મુક્તકેષુ પ્રબન્ધેષ્વિવ રસબન્ધાભિનિવેશિનઃ કવયો દૃશ્યન્તે। યથા હ્યમરુકસ્ય કવેર્મુક્તકાઃ શ‍ૃઙ્ગારરસસ્યન્દિનઃ પ્રબન્ધાયમાનાઃ પ્રસિદ્ધા એવ । સન્દાનિતકાદિષુ તુ વિકટનિબન્ધનૌચિત્યાન્મધ્યમસમાસાદીર્ઘ-સમાસે એવ રચને । પ્રબન્ધાશ્રયેષુ યથોક્તપ્રબન્ધૌચિત્યમેવાનુસર્તવ્યમ્ । પર્યાયબન્ધે પુનરસમાસામધ્યમસમાસે એવ સઙ્ઘટને । કદાચિદર્થૌચિત્યા-શ્રયેણ દીર્ઘસમાસાયામપિ સઙ્ઘટનાયાં પરુષા ગ્રામ્યા ચ વૃત્તિઃ પરિ-હર્તવ્યા । પરિકથાયાં કામચારઃ, તત્રેતિવૃત્તમાત્રોપન્યાસેન નાત્યન્તં રસબન્ધાભિનિવેશાત્ । ખણ્ડકથાસકલકથયોસ્તુ પ્રાકૃતપ્રસિદ્ધયોઃ કુલકા-દિનિબન્ધનભૂયસ્ત્વાદ્દીર્ઘસમાસાયામપિ ન વિરોધઃ । વૃત્ત્યૌચિત્યં તુ યથા-રસમનુસર્તવ્યમ્ । સર્ગબન્ધે તુ રસતાત્પર્યે યથારસમૌચિત્યમન્યથા તુ કામચારઃ, દ્વયોરપિ માર્ગયોઃ સર્ગબન્ધવિધાયિનાં દર્શનાદ્રસતાત્પર્યં સાધીયઃ । અભિનેયાર્થે તુ સર્વથા રસબન્ધેઽભિનિવેશઃ કાર્યઃ । આખ્યા-યિકાકથયોસ્તુ ગદ્યનિબન્ધનબાહુલ્યાદ્ગદ્યે ચ છન્દોબન્ધભિન્નપ્રસ્થાન-ત્વાદિહ નિયમે હેતુરકૃતપૂર્વોઽપિ મનાક્ક્રિયતે ॥ ૭॥

એતદ્યથોક્તમૌચિત્યમેવ તસ્યા નિયામકમ્ ।
સર્વત્ર ગદ્યબન્ધેઽપિ છન્દોનિયમવર્જિતે ॥ ૮॥

યદેતદૌચિત્યં વક્તૃવાચ્યગતં સઙ્ઘટનાયા નિયામકમુક્તમેતદેવ ગદ્યે છન્દોનિયમવર્જિતેઽપિ વિષયાપેક્ષં નિયમહેતુઃ । તથા હ્યત્રાપિ યદા કવિઃ કવિનિબદ્ધો વા વક્તા રસભાવરહિતસ્તદા કામચારઃ । રસભાવ-

સમન્વિતે તુ વક્તરિ પૂર્વોક્તમેવાનુસર્તવ્યમ્ । તત્રાપિ ચ વિષયૌચિત્યમેવ । આખ્યાયિકાયાં તુ ભૂમ્ના મધ્યમસમાસાદીર્ઘસમાસે એવ સઙ્ઘટને । ગદ્યસ્ય વિકટબન્ધાશ્રયેણ છાયાવત્ત્વાત્ । તત્ર ચ તસ્ય પ્રકૃષ્યમાણત્વાત્ । કથાયાં તુ વિકટબન્ધપ્રાચુર્યેઽપિ ગદ્યસ્ય રસબન્ધોક્તમૌચિત્યમનુસર્તવ્યમ્ ॥ ૮॥

રસબન્ધોક્તમૌચિત્યં ભાતિ સર્વત્ર સંશ્રિતા ।
રચના વિષયાપેક્ષં તત્તુ કિઞ્ચિદ્વિભેદવત્ ॥ ૯॥

અથવા પદ્યવદ્ગદ્યબન્ધેઽપિ રસબન્ધોક્તમૌચિત્યં સર્વત્ર સંશ્રિતા રચના ભવતિ । તત્તુ વિષયાપેક્ષં કિઞ્ચિદ્વિશેષવદ્ભવતિ, ન તુ સર્વાકારમ્ । તથા હિ ગદ્યબન્ધેઽપ્યતિદીર્ઘસમાસા રચના ન વિપ્રલમ્ભશ‍ૃઙ્ગારકરુણયોરાખ્યાયિકાયામપિ શોભતે । નાટકાદાવપ્યસમાસૈવ ન રૌદ્રવીરાદિવર્ણને । વિષયાપેક્ષં ત્વૌચિત્યં પ્રમાણતોઽપકૃષ્યતે પ્રકૃષ્યતે ચ । તથા હ્યાખ્યાયિકાયાં નાત્યન્તમસમાસા સ્વવિષયેઽપિ નાટકાદૌ નાતિદીર્ઘસમાસા ચેતિ સઙ્ઘટનાયા દિગનુસર્તવ્યા ॥ ૯॥

ઇદાનીમલક્ષ્યક્રમવ્યઙ્ગ્યો ધ્વનિઃ પ્રબન્ધાત્મા રામાયણમહાભારતાદૌ પ્રકાશમાનઃ પ્રસિદ્ધ એવ । તસ્ય તુ યથા પ્રકાશનં તત્પ્રતિપાદ્યતે –
વિભાવભાવાનુભાવસઞ્ચાર્યૌચિત્યચારુણઃ ।
વિધિઃ કથાશરીરસ્ય વૃત્તસ્યોત્પ્રેક્ષિતસ્ય વા ॥ ૧૦॥

ઇતિવૃત્તવશાયાતાં ત્યક્ત્વાઽનનુગુણાં સ્થિતિમ્ ।
ઉત્પ્રેક્ષ્યાઽપ્યન્તરાભીષ્ટરસોચિતકથોન્નયઃ ॥ ૧૧॥

સન્ધિસન્ધ્યઙ્ગઘટનં રસાભિવ્યક્ત્યપેક્ષયા ।
ન તુ કેવલયા શાસ્ત્રસ્થિતિસમ્પાદનેચ્છયા ॥ ૧૨॥

ઉદ્દીપનપ્રશમને યથાવસરમન્તરા ।
રસસ્યારબ્ધવિશ્રાન્તેરનુસન્ધાનમઙ્ગિનઃ ॥ ૧૩॥

અલઙ્કૃતીનાં શક્તાવપ્યાનુરૂપ્યેણ યોજનમ્ ।
પ્રબન્ધસ્ય રસાદીનાં વ્યઞ્જકત્વે નિબન્ધનમ્ ॥ ૧૪॥

પ્રબન્ધોઽપિ રસાદીનાં વ્યઞ્જક ઇત્યુક્તં તસ્ય વ્યઞ્જકત્વે નિબન્ધનમ્ । પ્રથમં તાવદ્વિભાવભાવાનુભાવસઞ્ચાર્યૌચિત્યચારુણઃ કથાશરીરસ્ય વિધિર્યથાયથં પ્રતિપિપાદયિષિતરસભાવાદ્યપેક્ષયા ય ઉચિતો વિભાવો

ભાવોઽનુભાવઃ સઞ્ચારી વા તદૌચિત્યચારુણઃ કથાશરીરસ્ય વિધિર્વ્ય-ઞ્જકત્વે નિબન્ધનમેકમ્ । તત્ર વિભાવૌચિત્યં તાવત્પ્રસિદ્ધમ્ । ભાવૌચિ-ત્યં તુ પ્રકૃત્યૌચિત્યાત્ । પ્રકૃતિર્હ્યુત્તમમધ્યમાધમભાવેન દિવ્યમાનુષાદિ-ભાવેન ચ વિભેદિની । તાં યથાયથમનુસૃત્યાસઙ્કીર્ણઃ સ્થાયી ભાવ ઉપનિબધ્યમાન ઔચિત્યભાગ્ ભવતિ । અન્યથા તુ કેવલમાનુષાશ્રયેણ દિવ્યસ્ય કેવલદિવ્યાશ્રયેણ વા કેવલમાનુષસ્યોત્સાહાદય ઉપનિબધ્ય-માના અનુચિતા ભવન્તિ । તથા ચ કેવલમાનુષસ્ય રાજાદેર્વર્ણને સપ્તા-ર્ણવલઙ્ઘનાદિલક્ષણા વ્યાપારા ઉપનિબધ્યમાના સૌષ્ઠવભૃતોઽપિ નીરસા એવ નિયમેન ભવન્તિ, તત્ર ત્વનૌચિત્યમેવ હેતુઃ ।

નનુ નાગલોકગમનાદયઃ સાતવાહનપ્રભૃતીનાં શ્રૂયન્તે, તદલો-કસામાન્યપ્રભાવાતિશયવર્ણને કિમનૌચિત્યં સર્વોર્વીભરણક્ષમાણાં ક્ષમા-ભુજામિતિ । ન તદસ્તિ ; ન વયં બ્રૂમો યત્પ્રભાવાતિશયવર્ણનમનુચિતં રાજ્ઞામ્, કિં તુ કેવલમાનુષાશ્રયેણ યોત્પાદ્યવસ્તુકથા ક્રિયતે તસ્યાં દિવ્યમૌચિત્યં ન યોજનીયમ્ । દિવ્યમાનુષ્યાયાં તુ કથાયામુભયૌચિત્ય-યોજનમવિરુદ્ધમેવ । યથા પાણ્ડ્વાદિકથાયામ્ । સાતવાહનાદિષુ તુ યેષુ યાવદપદાનં શ્રૂયતે તેષુ તાવન્માત્રમનુગમ્યમાનમનુગુણત્વેન પ્રતિભાસતે । વ્યતિરિક્તં તુ તેષામેવોપનિબધ્યમાનમનુચિતમ્ । તદયમત્ર પરમાર્થઃ —

અનૌચિત્યાદૃતે નાન્યદ્રસભઙ્ગસ્ય કારણમ્ ।
પ્રસિદ્ધૌચિત્યબન્ધસ્તુ રસસ્યોપનિષત્પરા ॥

અત એવ ચ ભરતે પ્રખ્યાતવસ્તુવિષયત્વં પ્રખ્યાતોદાત્તનાયકત્વં ચ નાટકસ્યાવશ્યકર્તવ્યતયોપન્યસ્તમ્ । તેન હિ નાયકૌચિત્યાનૌચિ-ત્યવિષયે કવિર્ન વ્યામુહ્યતિ । યસ્તૂત્પાદ્યવસ્તુ નાટકાદિ કુર્યાત્તસ્યાપ્ર-સિદ્ધાનુચિતનાયકસ્વભાવવર્ણને મહાન્ પ્રમાદઃ ।
નનુ યદ્યુત્સાહાદિભાવવર્ણને કથઞ્ચિદ્દિવ્યમાનુષ્યાદ્યૌચિત્યપરીક્ષા ક્રિયતે તત્ક્રિયતામ્, રત્યાદૌ તુ કિં તયા પ્રયોજનમ્ ? રતિર્હિ ભારત-વર્ષોચિતેનૈવ વ્યવહારેણ દિવ્યાનામપિ વર્ણનીયેતિ સ્થિતિઃ । નૈવમ્ ; તત્રૌચિત્યાતિક્રમેણ સુતરાં દોષઃ । તથા હ્યધમપ્રકૃત્યૌચિત્યેનોત્તમ-પ્રકૃતેઃ શૃઙ્ગારોપનિબન્ધને કા ભવેન્નોપહાસ્યતા । ત્રિવિધં પ્રકૃત્યૌચિ-ત્યં ભારતે વર્ષેઽપ્યસ્તિ શૃઙ્ગારવિષયમ્ । યત્તિ દિવ્યમૌચિત્યં તત્તત્રાનુપ-કારકમેવેતિ ચેત્ — ન વયં દિવ્યમૌચિત્યં શૃઙ્ગારવિષયમન્યત્કિઞ્ચિદ્-બ્રૂમઃ । કિં તર્હિ ? ભારતવર્ષવિષયે યથોત્તમનાયકેષુ રાજાદિષુ શૃઙ્ગા-

રોપનિબન્ધસ્તથા દિવ્યાશ્રયોऽપિ શોભતે । ન ચ રાજાદિષુ પ્રસિદ્ધ-
ગ્રામ્યશૃઙ્ગારોપનિબન્ધનં પ્રસિદ્ધં નાટકાદૌ, તથૈવ દેવેષુ તત્પરિહર્તવ્યમ્ ।
નાટકાદેરભિનેયાર્થત્વાદભિનયસ્ય ચ સમ્ભોગશૃઙ્ગારવિષયસ્યા-
સભ્યત્વાત્તત્ર પરિહાર ઇતિ ચેત્ — ન; યદ્યભિનયસ્યૈવંવિષયસ્યાસભ્યતા
તત્કાવ્યસ્યૈવંવિષયસ્ય સા કેન નિવાર્યતે ? તસ્માદભિનેયાર્થેऽનભિનેયાર્થે
વા કાવ્યે યદુત્તમપ્રકૃતે રાજાદેરુત્તમપ્રકૃતિભિર્નાયિકાભિઃ સહ ગ્રામ્ય-
સમ્ભોગવર્ણનં તત્પિત્રોઃ સમ્ભોગવર્ણનમિવ સુતરામસભ્યમ્ । તથૈવો-
ત્તમદેવતાદિવિષયમ્ ।

ન ચ સમ્ભોગશૃઙ્ગારસ્ય સુરતલક્ષણ એવૈકઃ પ્રકારઃ, યાવદન્યે-
ऽપિ પ્રભેદાઃ પરસ્પરપ્રેમદર્શનાદયઃ સમ્ભવન્તિ, તે કસ્માદુત્તમપ્રકૃતિ-
વિષયે ન વર્ણ્યન્તે ? તસ્માદુત્સાહવદ્રતાવપિ પ્રકૃત્યૌચિત્યમનુસર્તવ્યમ્ ।
તથૈવ વિસ્મયાદિષુ। યત્ત્વેવંવિધે વિષયે મહાકવીનામપ્યસમીક્ષ્યકારિતા
લક્ષ્યે દૃશ્યતે સ દોષ એવ । સ તુ શક્તિતિરસ્કૃતત્વાત્તેષાં ન લક્ષ્યત
ઇત્યુક્તમેવ । અનુભાવૌચિત્યં તુ ભરતાદૌ પ્રસિદ્ધમેવ।

ઇયત્તૂચ્યતે – ભરતાદિવિરચિતાં સ્થિતિં ચાનુવર્તમાનેન મહાકવિ-
પ્રબન્ધાંશ્ચ પર્યાલોચયતા સ્વપ્રતિભાં ચાનુસરતા કવિનાવહિતચેતસા
ભૂત્વા વિભાવાદ્યૌચિત્યભ્રંશપરિત્યાગે પરઃ પ્રયત્નો વિધેયઃ । ઔચિ-
ત્યવતઃ કથાશરીરસ્ય વૃત્તસ્યોત્પ્રેક્ષિતસ્ય વા ગ્રહો વ્યઞ્જક ઇત્યનેનૈતત્
પ્રતિપાદયતિ — યદિતિહાસાદિષુ કથાસુ રસવતીષુ વિવિધાસુ સતી-
ષ્વપિ યત્તત્ર વિભાવાદ્યૌચિત્યવત્કથાશરીરં તદેવ ગ્રાહ્યં નેતરત્ । વૃત્તા-
દપિ ચ કથાશરીરાદુત્પ્રેક્ષિતે વિશેષતઃ પ્રયત્નવતા ભવિતવ્યમ્ । તત્ર
હ્યનવધાનાત્સ્ખલતઃ કવેરવ્યુત્પત્તિસમ્ભાવના મહતી ભવતિ ।

પરિકરશ્લોકશ્ચાત્ર —

કથાશરીરમુત્પાદ્યવસ્તુ કાર્યં તથા તથા ।
યથા રસમયં સર્વમેવ તત્પ્રતિભાસતે ॥

તત્ર ચાભ્યુપાયઃ સમ્યગ્વિભાવાદ્યૌચિત્યાનુસરણમ્ । તચ્ચ દર્શિ-
તમેવ । કિઞ્ચ —

સન્તિ સિદ્ધરસપ્રખ્યા યે ચ રામાયણાદયઃ ।
કથાશ્રયા ન તૈર્યોજ્યા સ્વેચ્છા રસવિરોધિની ॥

તેષુ હિ કથાશ્રયેષુ તાવત્સ્વેચ્છૈવ ન યોજ્યા । યદુક્તમ્ —"કથા-
માર્ગે ન ચાલ્પોऽપ્યતિક્રમઃ"। સ્વેચ્છાપિ યદિ યોજ્યા તદ્રસવિરોધિની

ન યોજ્યા ।

ઇદમરં પ્રબન્ધસ્ય રસાભિવ્યઞ્જકત્વે નિબન્ધનમ્ । ઇતિવૃત્તવશા-
યાતાં કથઞ્ચિદ્રસાનનુગુણાં સ્થિતિં ત્યક્ત્વા પુનરુત્પ્રેક્ષ્યાપ્યન્તરાભીષ્ટ-
રસોચિતકથોન્નયો વિધેયઃ યથા કાલિદાસપ્રબન્ધેષુ । યથા ચ સર્વ-
સેનવિરચિતે હરિવિજયે । યથા ચ મદીય એવાર્જુનચરિતે મહાકાવ્યે ।
કવિના કાવ્યમુપનિબધ્નતા સર્વાત્મના રસપરતન્ત્રેણ ભવિતવ્યમ્ । તત્રે-
તિવૃત્તે યદિ રસાનનુગુણાં સ્થિતિં પશ્યેત્તદેમાં ભઙ્ક્ત્વાપિ સ્વતન્ત્રતયા
રસાનુગુણં કથાન્તરમુત્પાદયેત્ । ન હિ કવેરિતિવૃત્તમાત્રનિર્વહણેન
કિઞ્ચિત્પ્રયોજનમ્, ઇતિહાસાદેવ તત્સિદ્ધેઃ ।
રસાદિવ્યઞ્જકત્વે પ્રબન્ધસ્ય ચેદમન્યન્મુખ્યં નિબન્ધનમ્, યત્સન્ધીનાં
મુખપ્રતિમુખગર્ભાવમર્શનિર્વહણાખ્યાનાં તદઙ્ગાનાં ચોપક્ષેપાદીનાં ઘટનં
રસાભિવ્યક્ત્યપેક્ષયા, યથા રત્નાવલ્યામ્; ન તુ કેવલં શાસ્ત્રસ્થિતિ-
સમ્પાદનેચ્છયા । યથા વેણીસંહારે વિલાસાખ્યસ્ય પ્રતિમુખસન્ધ્યઙ્ગ-
સ્ય પ્રકૃતરસનિબન્ધાનનુગુણમપિ દ્વિતીયેઽઙ્કે ભરતમતાનુસરણમાત્રેચ્છયા
ઘટનમ્ ।

ઇદં ચાપરં પ્રબન્ધસ્ય રસવ્યઞ્જકત્વે નિમિત્તં યદુદ્દીપનપ્રશમને
યથાવસરમન્તરા રસસ્ય, યથા રત્નાવલ્યામેવ । પુનરારબ્ધવિશ્રાન્તે રસ-
સ્યાઙ્ગિનોઽનુસન્ધિશ્ચ । યથા તાપસવત્સરાજે । પ્રબન્ધવિશેષસ્ય નાટ-
કાદે રસવ્યક્તિનિમિત્તમિદં ચાપરમવગન્તવ્યં યદલઙ્કૃતીનાં શક્તાવપ્યા-
નુરૂપ્યેણ યોજનમ્ । શક્તો હિ કવિઃ કદાચિદલઙ્કારનિબન્ધને તદા-
ક્ષિપ્તતયૈવાનપેક્ષિતરસબન્ધઃ પ્રબન્ધમારભતે તદુપદેશાર્થમિદમુક્તમ્ ।
દૃશ્યન્તે ચ કવયોઽલઙ્કારનિબન્ધનૈકરસા અનપેક્ષિતરસાઃ પ્રબન્ધેષુ ।
કિઞ્ચ —
અનુસ્વાનોપમાત્માપિ પ્રભેદો ય ઉદાહૃતઃ ।
ધ્વનેરસ્ય પ્રબન્ધેષુ ભાસતે સોઽપિ કેષુચિત્ ॥ ૧૫॥

અસ્ય વિવક્ષિતાન્યપરવાચ્યસ્ય ધ્વનેરનુરણનરૂપવ્યઙ્ગ્યોઽપિ યઃ
પ્રભેદ ઉદાહૃતો દ્વિપ્રકારઃ સોઽપિ પ્રબન્ધેષુ કેષુચિદ્દ્યોતતે । તદ્યથા
મધુમથનવિજયે પાઞ્ચજન્યોક્તિષુ । યથા વા મમૈવ કામદેવસ્ય સહ-
ચરસમાગમે વિષમબાણલીલાયામ્ । યથા ચ ગૃધ્રગોમાયુસંવાદાદૌ મહા-
ભારતે ॥ ૧૫॥

સુપ્તિઙ્વચનસમ્બન્ધૈસ્તથા કારકશક્તિભિઃ ।
કૃત્તદ્ધિતસમાસૈશ્ચ દ્યોત્યોઽલક્ષ્યક્રમઃ ક્વચિત્ ॥ ૧૬॥

અલક્ષ્યક્રમો ધ્વનેરાત્મા રસાદિઃ સુબ્વિશેષૈસ્તિઙ્વિશેષૈર્વચનવિશેષૈઃ સમ્બન્ધવિશેષૈઃ કારકશક્તિભિઃ કૃદ્વિશેષૈસ્તદ્ધિતવિશેષૈઃ સમાસૈશ્ચેતિ । ચશબ્દાન્નિપાતોપસર્ગકાલાદિભિઃ પ્રયુક્તૈરભિવ્યજ્યમાનો દૃશ્યતે ।
યથા —
ન્યક્કારો હ્યયમેવ મે યદરયસ્તત્રાપ્યસૌ તાપસઃ
સોઽપ્યત્રૈવ નિહન્તિ રાક્ષસકુલં જીવત્યહો રાવણઃ ।
ધિગ્ધિક્છક્રજિતં પ્રબોધિતવતા કિં કુમ્ભકર્ણેન વા
સ્વર્ગગ્રામટિકાવિલુણ્ઠનવૃથોચ્છૂનૈઃ કિમેભિર્ભુજૈઃ ॥

અત્ર હિ શ્લોકે ભૂયસા સર્વેષામપ્યેષાં સ્ફુટમેવ વ્યઞ્જકત્વં દૃશ્યતે । તત્ર"મે યદરયઃ"ઇત્યનેન સુપ્સમ્બન્ધવચનાનામભિવ્યઞ્જકત્વમ્ । "તત્રાપ્યસૌ તાપસઃ"ઇત્યત્ર તદ્ધિતનિપાતયોઃ ।"સોઽપ્યત્રૈવ નિહન્તિ રાક્ષસકુલં જીવત્યહો રાવણઃ"ઇત્યત્ર તિઙ્કારકશક્તીનામ્ ।"ધિગ્ધિક્છક્રજિતમ્"ઇત્યાદૌ શ્લોકાર્ધે કૃત્તદ્ધિતસમાસોપસર્ગાણામ્ । એવંવિધસ્ય વ્યઞ્જકભૂયસ્ત્વે ચ ઘટમાને કાવ્યસ્ય સર્વાતિશાયિની બન્ધચ્છાયા સમુન્મીલતિ । યત્ર હિ વ્યઙ્ગ્યાવભાસિનઃ પદસ્યૈકસ્યૈવ તાવદાવિર્ભાવસ્તત્રાપિ કાવ્યે કાપિ બન્ધચ્છાયા કિમુત યત્ર તેષાં બહૂનાં સમવાયઃ । યથાત્રાનન્તરોદિતશ્લોકે । અત્ર હિ રાવણ ઇત્યસ્મિન્ પદેઽર્થાન્તરસંક્રમિતવાચ્યેન ધ્વનિપ્રભેદેનાલઙ્કૃતેઽપિ પુનરનન્તરોક્તાનાં વ્યઞ્જકપ્રકારાણામુદ્ભાસનમ્ । દૃશ્યન્તે ચ મહાત્મનાં પ્રતિભાવિશેષભાજાં બાહુલ્યેનૈવંવિધા બન્ધપ્રકારાઃ ।
યથા મહર્ષેર્વ્યાસસ્ય —
અતિક્રાન્તસુખાઃ કાલાઃ પ્રત્યુપસ્થિતદારુણાઃ ।
શ્વઃ શ્વઃ પાપીયદિવસા પૃથિવી ગતયૌવના ॥

અત્ર હિ કૃત્તદ્ધિતવચનૈરલક્ષ્યક્રમવ્યઙ્ગ્યઃ,"પૃથિવી ગતયૌવના" ઇત્યનેન ચાત્યન્તતિરસ્કૃતવાચ્યો ધ્વનિઃ પ્રકાશિતઃ ।
એષાં ચ સુબાદીનામેકૈકશઃ સમુદિતાનાં ચ વ્યઞ્જકત્વં મહાકવીનાં પ્રબન્ધેષુ પ્રાયેણ દૃશ્યતે । સુબન્તસ્ય વ્યઞ્જકત્વં યથા —
તાલૈઃ શિઞ્જદ્વલયસુભગૈઃ કાન્તયા નર્તિતો મે ।
યામધ્યાસ્તે દિવસવિગમે નીલકણ્ઠઃ સુહૃદ્વઃ ॥

તિઙન્તસ્ય યથા —
અપસર રોદિતુમેવ નિર્મિતે મા પુંસય હતે અક્ષિણી મે ।
દર્શનમાત્રોન્મત્તાભ્યાં યાભ્યાં તવ હૃદયમેવંરૂપં ન જ્ઞાતમ્ ॥

યથા વા —
મા પન્થાનં રુધઃ અપેહિ બાલક અપ્રૌઢ અહો અસિ અહ્રીકઃ ।
વયં પરતન્ત્રા યતઃ શૂન્યગૃહં મામકં રક્ષણીયં વર્તતે ॥

સમ્બન્ધસ્ય યથા —
અનયત્ર વ્રજ બાલક સ્નાન્તીં કિં માં પ્રલોકયસ્યેતત્ ।
ભો જાયાભીરુકાણાં તટમેવ ન ભવતિ ॥

કૃતકપ્રયોગેષુ પ્રાકૃતેષુ તદ્ધિતવિષયે વ્યઞ્જકત્વમાવેદ્યત એવ । અવજ્ઞાતિશયે કઃ । સમાસાનાં ચ વૃત્ત્યૌચિત્યેન વિનિયોજને । નિપાતાનાં વ્યઞ્જકત્વં યથા —
અયમેકપદે તયા વિયોગઃ પ્રિયયા ચોપનતઃ સુદુઃસહો મે ।
નવવારિધરોદયાદહોભિર્ભવિતવ્યં ચ નિરાતપાર્ધરમ્યૈઃ ॥

ઇત્યત્ર ચશબ્દઃ । યથા વા
મુહુરઙ્ગુલિસંવૃતાધરૌષ્ઠં પ્રતિષેધાક્ષરવિક્લવાભિરામમ્ ।
મુખમંસવિવર્તિ પક્ષ્મલાક્ષ્યાઃ કથમપ્યુન્નમિતં ન ચુમ્બિતં તુ ॥

અત્ર તુશબ્દઃ । નિપાતાનાં પ્રસિદ્ધમપીહ દ્યોતકત્વં રસાપેક્ષયોક્તમિતિ દ્રષ્ટવ્યમ્ । ઉપસર્ગાણાં વ્યઞ્જકત્વં યથા —
નીવારાઃ શુકગર્ભકોટરમુખભ્રષ્ટાસ્તરૂણામધઃ
પ્રસ્નિગ્ધાઃ ક્વચિદિઙ્ગુદીફલભિદઃ સૂચ્યન્ત એવોપલાઃ ।
વિશ્વાસોપગમાદભિન્નગતયઃ શબ્દં સહન્તે મૃગા-
સ્તોયાધારપથાશ્ચ વલ્કલશિખાનિષ્યન્દલેખાઙ્કિતાઃ ॥

ઇત્યાદૌ । દ્વિત્રાણાં ચોપસર્ગાણામેકત્ર પદે યઃ પ્રયોગઃ સોઽપિ રસવ્યક્ત્યનુગુણતયૈવ નિર્દોષઃ । યથા –"પ્રભ્રશ્યત્યુત્તરીયત્વિષિ તમસિ સમુદ્વીક્ષ્ય વીતાવૃતીન્દ્રાગ્જન્તૂન્"ઇત્યાદૌ । યથા વા — "મનુષ્યવૃત્ત્યા સમુપાચરન્તમ્"ઇત્યાદૌ ।

નિપાતાનામપિ તથૈવ । યથા —"અહો બતાસિ સ્પૃહણીયવીર્યઃ" ઇત્યાદૌ । યથા વા —

યે જીવન્તિ ન માન્તિ યે સ્મ વપુષિ પ્રીત્યા પ્રનૃત્યન્તિ ચ
પ્રસ્યન્દિપ્રમદાશ્રવઃ પુલકિતા દૃષ્ટે ગુણિન્યૂર્જિતે ।
હા ધિક્કષ્ટમહો ક્વ યામિ શરણં તેષાં જનાનાં કૃતે
નીતાનાં પ્રલયં શઠેન વિધિના સાધુદ્વિષઃ પુષ્યતા ।
ઇત્યાદૌ ।

પદપૌનરુક્ત્યં ચ વ્યઞ્જકત્વાપેક્ષયૈવ કદાચિત્પ્રયુજ્યમાનં શોભા-
માવહતિ । યથા —
યદ્વઞ્ચનાહિતમતિર્બહુચાટુગર્ભં
કાર્યોન્મુખઃ ખલજનઃ કૃતકં બ્રવીતિ ।
તત્સાધવો ન ન વિદન્તિ વિદન્તિ કિન્તુ
કર્તું વૃથાપ્રણયમસ્ય ન પારયન્તિ ।
ઇત્યાદૌ ।
કાલસ્ય વ્યઞ્જકત્વં યથા —
સમવિષમનિર્વિશેષાઃ સમન્તતો મન્દમન્દસઞ્ચારાઃ ।
અચિરાદ્ભવિષ્યન્તિ પન્થાનો મનોરથાનામપિ દુર્લઙ્ઘ્યાઃ ॥

અત્ર હ્યચિરાદ્ભવિષ્યન્તિ પન્થાન ઇત્યત્ર ભવિષ્યન્તીત્યસ્મિન્ પદે
પ્રત્યયઃ કાલવિશેષાભિધાયી રસપરિપોષહેતુઃ પ્રકાશતે । અયં હિ
ગાથાર્થઃ પ્રવાસવિપ્રલમ્ભશૃઙ્ગારવિભાવતયા વિભાવ્યમાનો રસવાન્ ।
યથાત્ર પ્રત્યયાંશો વ્યઞ્જકસ્તથા ક્વચિત્પ્રકૃત્યંશોઽપિ દૃશ્યતે । યથા —
તદ્ગેહં નતભિત્તિ મન્દિરમિદં લબ્ધાવગાહં દિવઃ
સા ધેનુર્જરતી ચરન્તિ કરિણામેતા ઘનાભા ઘટાઃ ।
સ ક્ષુદ્રો મુસલધ્વનિઃ કલમિદં સઙ્ગીતકં યોષિતા-
માશ્ચર્યં દિવસૈર્દ્વિજોઽયમિયતીં ભૂમિં સમારોપિતઃ ॥

અત્ર શ્લોકે દિવસૈરિત્યસ્મિન્ પદે પ્રકૃત્યંશોઽપિ દ્યોતકઃ । સર્વ-
નામ્નાં ચ વ્યઞ્જકત્વં યથાનન્તરોક્તે શ્લોકે । અત્ર ચ સર્વનામ્નામેવ
વ્યઞ્જકત્વં હૃદિ વ્યવસ્થાપ્ય કવિના ક્વેત્યાદિશબ્દપ્રયોગો ન કૃતઃ ।
અનયા દિશા સહૃદયૈરન્યેઽપિ વ્યઞ્જકવિશેષાઃ સ્વયમુત્પ્રેક્ષણીયાઃ । એત-
ચ્ચ સર્વં પદવાક્યરચનાદ્યોતનોક્ત્યૈવ ગતાર્થમપિ વૈચિત્ર્યેણ વ્યુત્પત્તયે
પુનરુક્તમ્ ।
નનુ ચાર્થસામર્થ્યાક્ષેપ્યા રસાદય ઇત્યુક્તમ્, તથા ચ સુબાદીનાં
વ્યઞ્જકત્વવૈચિત્ર્યકથનમનન્વિતમેવ । ઉક્તમત્ર પદાનાં વ્યઞ્જકત્વો-

ક્ત્યવસરે । કિઞ્ચાર્થવિશેષાક્ષેપ્યત્વેઽપિ રસાદીનાં તેષામર્થવિશેષાણાં વ્ય-
ઞ્જકશબ્દાવિનાભાવિત્વાદ્યથાપ્રદર્શિતં વ્યઞ્જકસ્વરૂપપરિજ્ઞાનં વિભજ્યો-
પયુજ્યત એવ । શબ્દવિશેષાણાં ચાન્યત્ર ચ ચારુત્વં યદ્વિભાગેનોપદર્શિતં
તદપિ તેષાં વ્યઞ્જકત્વેનૈવાવસ્થિતમિત્યવગન્તવ્યમ્ ।
યત્રાપિ તત્સમ્પ્રતિ ન પ્રતિભાસતે તત્રાપિ વ્યઞ્જકે રચનાન્તરે
યદ્ દૃષ્ટં સૌષ્ઠવં તેષાં પ્રવાહપતિતાનાં તદેવાભ્યાસાદપોદ્ધૃતાનામપ્યવ-
ભાસત ઇત્યવસાતવ્યમ્ । કોઽન્યથા તુલ્યે વાચકત્વે શબ્દાનાં ચારુત્વ-
વિષયો વિશેષઃ સ્યાત્ ।
અન્ય એવાસૌ સહૃદયસંવેદ્ય ઇતિ ચેત્, કિમિદં સહૃદયત્વં
નામ ? કિં રસભાવાનપેક્ષકાવ્યાશ્રિતસમયવિશેષાભિજ્ઞત્વમ્, ઉત
રસભાવાદિમયકાવ્યસ્વરૂપપરિજ્ઞાનનૈપુણ્યમ્ । પૂર્વસ્મિન્ પક્ષે તથા-
વિધસહૃદયવ્યવસ્થાપિતાનાં શબ્દવિશેષાણાં ચારુત્વનિયમો ન સ્યાત્ ।
પુનઃ સમયાન્તરેણાન્યથાપિ વ્યવસ્થાપનસમ્ભવાત્ । દ્વિતીયસ્મિંસ્તુ પક્ષે
રસજ્ઞતૈવ સહૃદયત્વમિતિ । તથાવિધૈઃ સહૃદયૈઃ સંવેદ્યો રસાદિસમર્પણ-
સામર્થ્યમેવ નૈસર્ગિકં શબ્દાનાં વિશેષ ઇતિ વ્યઞ્જકત્વાશ્રય્યેવ તેષાં
મુખ્યં ચારુત્વમ્ । વાચકત્વાશ્રયાણાન્તુ પ્રસાદ એવાર્થાપેક્ષાયાં તેષાં
વિશેષઃ । અર્થાનપેક્ષાયાં ત્વનુપ્રાસાદિરેવ ॥ ૧૫-૧૬॥

એવં રસાદીનાં વ્યઞ્જકસ્વરૂપમભિધાય તેષામેવ વિરોધિરૂપં લક્ષ-
યિતુમિદમુપક્રમ્યતે —
પ્રબન્ધે મુક્તકે વાપિ રસાદીન્બન્દ્ધુમિચ્છતા ।
યત્નઃ કાર્યઃ સુમતિના પરિહારે વિરોધિનામ્ ॥ ૧૭॥

પ્રબન્ધે મુક્તકે વાપિ રસભાવનિબન્ધનં પ્રત્યાદૃતમનાઃ કવિર્વિરો-
ધિપરિહારે પરં યત્નમાદધીત । અન્યથા ત્વસ્ય રસમયઃ શ્લોક એકોઽપિ
સમ્યઙ્ન સમ્પદ્યતે ॥ ૧૭॥

કાનિ પુનસ્તાનિ વિરોધીનિ યાનિ યત્નતઃ કવેઃ પરિહર્તવ્યાનીત્યુચ્યતે —
વિરોધિરસસમ્બન્ધિવિભાવાદિપરિગ્રહઃ ।
વિસ્તરેણાન્વિતસ્યાપિ વસ્તુનોઽન્યસ્ય વર્ણનમ્ ॥ ૧૮॥

અકાણ્ડ એવ વિચ્છિત્તિરકાણ્ડે ચ પ્રકાશનમ્ ।
પરિપોષં ગતસ્યાપિ પૌનઃપુન્યેન દીપનમ્ ।
રસસ્ય સ્યાદ્વિરોધાય વૃત્ત્યનૌચિત્યમેવ ચ ॥ ૧૯॥

પ્રસ્તુતરસાપેક્ષયા વિરોધી યો રસસ્તસ્ય સમ્બન્ધિનાં વિભાવભાવા- નુભાવાનાં પરિગ્રહો રસવિરોધહેતુકઃ સમ્ભવનીયઃ । તત્ર વિરોધિરસ- વિભાવપરિગ્રહો યથા શાન્તરસવિભાવેષુ તદ્વિભાવતયૈવ નિરૂપિતેષ્વનન્ત- રમેવ શૃઙ્ગારાદિવિભાવવર્ણને । વિરોધિરસભાવપરિગ્રહો યથા પ્રિયં પ્રતિ પ્રણયકલહકુપિતાસુ કામિનીષુ વૈરાગ્યકથાભિરનુનયે । વિરોધિરસાનુ- ભાવપરિગ્રહો યથા પ્રણયકુપિતાયાં પ્રિયાયામપ્રસીદન્ત્યાં નાયકસ્ય કો- પાવેશવિવશસ્ય રૌદ્રાનુભાવવર્ણને ।
અયં ચાન્યો રસભઙ્ગહેતુર્યત્પ્રસ્તુતરસાપેક્ષયા વસ્તુનોઽન્યસ્ય કથ- ઞ્ચિદન્વિતસ્યાપિ વિસ્તરેણ કથનમ્ । યથા વિપ્રલમ્ભશૃઙ્ગારે નાયકસ્ય કસ્યચિદ્વર્ણયિતુમુપક્રાન્તે કવેર્યમકાદ્યલઙ્કારનિબન્ધનરસિકતયા મહતા પ્રબન્ધેન પર્વતાદિવર્ણને । અયં ચાપરો રસભઙ્ગહેતુરવગન્તવ્યો યદકાણ્ડ- એવ વિચ્છિત્તિઃ રસસ્યાકણ્ડ એવ ચ પ્રકાશનમ્ । તત્રાનવસરે વિરામો રસસ્ય યથા નાયકસ્ય કસ્યચિત્સ્પૃહણીયસમાગમયા નાયિકયા કયા- ચિત્પરાં પરિપોષપદવીં પ્રાપ્તે શૃઙ્ગારે વિદિતે ચ પરસ્પરાનુરાગે સમાગ- મોપાયચિન્તોચિતં વ્યવહારમુત્સૃજ્ય સ્વતન્ત્રતયા વ્યાપારાન્તરવર્ણને । અનવસરે ચ પ્રકાશનં રસસ્ય યથા પ્રવૃત્તે પ્રવૃત્તવિવિધવીરસઙ્ક્ષયે કલ્પ- સઙ્ક્ષયકલ્પે સઙ્ગ્રામે રામદેવપ્રાયસ્યાપિ તાવન્નાયકસ્યાનુપક્રાન્તવિપ્રલ- મ્ભશૃઙ્ગારસ્ય નિમિત્તમુચિતમન્તરેણૈવ શૃઙ્ગારકથાયામવતારવર્ણને । ન ચૈવંવિધે વિષયે દૈવવ્યામોહિતત્વં કથાપુરુષસ્ય પરિહારો યતો રસબન્ધ એવ કવેઃ પ્રાધાન્યેન પ્રવૃત્તિનિબન્ધનં યુક્તમ્ । ઇતિવૃત્તવર્ણનં તદુપાય એવેત્યુક્તં પ્રાક્“આલોકાર્થિ યથા દીપશિખાયાં યત્નવાઞ્જનઃ”ઇત્યાદિના ।

અત એવ ચેતિવૃત્તમાત્રવર્ણનપ્રાધાન્યેઽઙ્ગાઙ્ગિભાવરહિતરસભાવનિબ- ન્ધેન ચ કવીનામેવંવિધાનિ સ્ખલિતાનિ ભવન્તીતિ રસાદિરૂપવ્યઙ્ગ્ય- તાત્પર્યમેવૈષાં યુક્તમિતિ યત્નોઽસ્માભિરારબ્ધો ન ધ્વનિપ્રતિપાદન- માત્રાભિનિવેશેન । પુનશ્ચાયમન્યો રસભઙ્ગહેતુરવધારણીયો યત્પરિપોષં ગતસ્યાપિ રસસ્ય પૌનઃપુન્યેન દીપનમ્ । ઉપભુક્તો હિ રસઃ સ્વસામગ્રી- લબ્ધપરિપોષઃ પુનઃ પુનઃ પરામૃશ્યમાનઃ પરિમ્લાનકુસુમકલ્પઃ કલ્પતે । તથા વૃત્તેર્વ્યવહારસ્ય યદનૌચિત્યં તદપિ રસભઙ્ગહેતુરેવ । યથા નાયકં પ્રતિ નાયિકાયાઃ કસ્યાશ્ચિદુચિતાં ભઙ્ગિમન્તરેણ સ્વયં સમ્ભોગાભિલા- ષકથને । યદિ વા વૃત્તીનાં ભરતપ્રસિદ્ધાનાં કૈશિક્યાદીનાં કાવ્યા- લઙ્કારાન્તરપ્રસિદ્ધાનામુપનાગરિકાદ્યાનાં વા યદનૌચિત્યમવિષયે નિબન્ધનં

તદપિ રસભઙ્ગહેતુઃ । એવમેષાં રસવિરોધિનામન્યેષાં ચાનયા દિશા સ્વયમુ-
ત્પ્રેક્ષિતાનાં પરિહારે સત્કવિભિરવહિતૈર્ભવિતવ્યમ્ । પરિકરશ્લોકાશ્ચાત્ર —
મુખ્યા વ્યાપારવિષયાઃ સુકવીનાં રસાદયઃ ।
તેષામ્ નિબન્ધને ભાવ્યે તૈઃ સદૈવાપ્રમાદિભિઃ ॥

નીરસસ્તુ પ્રબન્ધો યઃ સોઽપશબ્દો મહાન્ કવેઃ ।
સ તેનાકવિરેવ સ્યાદન્યેનાસ્મૃતલક્ષણઃ ॥

પૂર્વે વિશૃઙ્ખલગિરઃ કવયઃ પ્રાપ્યકીર્તયઃ ।
તાન્સમાશ્રિત્ય ન ત્યાજ્યા નીતિરેષા મનીષિણા ॥

વાલ્મીકિવ્યાસમુખ્યાશ્ચ યે પ્રખ્યાતાઃ કવીશ્વરાઃ ।
તદભિપ્રાયબાહ્યોઽયં નાસ્માભિર્દર્શિતો નયઃ ॥ ઇતિ ॥ ૧૯॥

વિવક્ષિતે રસે લબ્ધપ્રતિષ્ઠે તુ વિરોધિનામ્ ।
બાધ્યાનામઙ્ગભાવં વા પ્રાપ્તાનામુક્તિરચ્છલા ॥ ૨૦॥

સ્વસામગ્ર્યા લબ્ધપરિપોષે તુ વિવક્ષિતે રસે વિરોધિનાં વિરોધિ-
રસાઙ્ગાનાં બાધ્યાનામઙ્ગભાવં વા પ્રાપ્તાનાં સતામુક્તિરદોષા । બાધ્યત્વં હિ
વિરોધિનાં શક્યાભિભવત્વે સતિ નાન્યથા । તથા ચ તેષામુક્તિઃ પ્રસ્તુત-
રસપરિપોષાયૈવ સમ્પદ્યતે । અઙ્ગભાવં પ્રાપ્તાનાં ચ તેષાં વિરોધિત્વમેવ
નિવર્તતે । અઙ્ગભાવપ્રાપ્તિર્હિ તેષાં સ્વાભાવિકી સમારોપકૃતા વા । તત્ર
યેષાં નૈસર્ગિકી તેષાં તાવદુક્તાવવિરોધ એવ । યથા વિપ્રલમ્ભશૃઙ્ગારે તદ-
ઙ્ગાનાં વ્યાધ્યાદીનાં તેષાઞ્ચ તદઙ્ગાનાંએવાદોષો નાતદઙ્ગાનામ્ । તદઙ્ગત્વે
ચ સમ્ભવત્યપિ મરણસ્યોપન્યાસો ન જ્યાયાન્ । આશ્રયવિચ્છેદે રસસ્યા-
ત્યન્તવિચ્છેદપ્રાપ્તેઃ । કરુણસ્ય તુ તથાવિધે વિષયે પરિપોષો ભવિષ્ય-
તીતિ ચેત્ ન ; તસ્યાપ્રસ્તુતત્વાત્ પ્રસ્તુતસ્ય ચ વિચ્છેદાત્ । યત્ર તુ
કરુણરસસ્યૈવ કાવ્યાર્થત્વં તત્રાવિરોધઃ । શૃઙ્ગારે વા મરણસ્યાદીર્ઘકાલ-
પ્રત્યાપત્તિસમ્ભવે કદાચિદુપનિબન્ધો નાત્યન્તવિરોધી । દીર્ઘકાલ-
પ્રત્યાપત્તૌ તુ તસ્યાન્તરા પ્રવાહવિચ્છેદ એવેત્યેવંવિધેતિવૃત્તોપનિબન્ધનં
રસબન્ધપ્રધાનેન કવિના પરિહર્તવ્યમ્ ।

તત્ર લબ્ધપ્રતિષ્ઠે તુ વિવક્ષિતે રસે વિરોધિરસાઙ્ગાનાં બાધ્યત્વેનોક્તા-
વદોષો યથા —
ક્વાકાર્યં શશલક્ષ્મણઃ ક્વ ચ કુલં ભૂયોઽપિ દૃશ્યેત સા
દોષાણાં પ્રશમાય મે શ્રુતમહો કોપેઽપિ કાન્તં મુખમ્ ।

કિં વક્ષ્યન્ત્યપકલ્મષાઃ કૃતધિયઃ સ્વપ્નેઽપિ સા દુર્લભા
ચેતઃ સ્વાસ્થ્યમુપૈહિ કઃ ખલુ યુવા ધન્યોઽધરં પાસ્યતિ ॥

યથા વા પુણ્ડરીકસ્ય મહાશ્વેતાં પ્રતિ પ્રવૃત્તનિર્ભરાનુરાગસ્ય દ્વિતીય-
મુનિકુમારોપદેશવર્ણને । સ્વાભાવિક્યામઙ્ગભાવપ્રાપ્તાવદોષો યથા —
ભ્રમિમરતિમલસહૃદયતાં પ્રલયં મૂર્ચ્છાં તમઃ શરીરસાદમ્ ।
મરણં ચ જલદભુજગજં પ્રસહ્ય કુરુતે વિષં વિયોગિનીનામ્ ॥

ઇત્યાદૌ । સમારોપિતાયામપ્યવિરોધો યથા —"પાણ્ડુક્ષામમ્"ઇત્યાદૌ ।
ઇયં ચાઙ્ગભાવપ્રાપ્તિરન્યા યદાધિકારિકત્વાત્પ્રધાન એકસ્મિન્વાક્યાર્થે
રસયોર્ભાવયોર્વા પરસ્પરવિરોધિનોર્દ્વયોરઙ્ગભાવગમનં તસ્યામપિ
ન દોષઃ । યથોક્તં"ક્ષિપ્તો હાસ્તાવલગ્નઃ"ઇત્યાદૌ । કથં તત્રાવિરોધ
ઇતિ ચેત્, દ્વયોરપિ તયોરન્યપરત્વેન વ્યવસ્થાનાત્ । અન્યપરત્વેઽપિ
વિરોધિનોઃ કથં વિરોધનિવૃત્તિરિતિ ચેત્, ઉચ્યતે — વિધૌ વિરુદ્ધ-
સમાવેશસ્ય દુષ્ટત્વં નાનુવાદે ।
યથા —
એહિ ગચ્છ પતોત્તિષ્ઠ વદ મૌનં સમાચર ।
એવમાશાગ્રહગ્રસ્તૈઃ ક્રીડન્તિ ધનિનોઽર્થિભિઃ ॥

ઇત્યાદૌ । અત્ર હિ વિધિપ્રતિષેધયોરનૂદ્યમાનત્વેન સમાવેશે ન
વિરોધસ્તથેહાપિ ભવિષ્યતિ । શ્લોકે હ્યસ્મિન્નીર્ષ્યાવિપ્રલમ્ભશૃઙ્ગારકરુણ-
વસ્તુનોર્ન વિધીયમાનત્વમ્ । ત્રિપુરરિપુપ્રભાવાતિશયસ્ય વાક્યાર્થત્વા-
ત્તદઙ્ગત્વેન ચ તયોર્વ્યવસ્થાનાત્ ।
ન ચ રસેષુ વિધ્યનુવાદવ્યવહારો નાસ્તીતિ શક્યં વક્તુમ્, તેષાં
વાક્યાર્થત્વેનાભ્યુપગમાત્ । વાક્યાર્થસ્ય વાચ્યસ્ય ચ યૌ વિધ્યનુવાદૌ
તૌ તદાક્ષિપ્તાનાં રસાનાં કેન વાર્યતે । યૈર્વા સાક્ષાત્કાવ્યાર્થતા રસાદીનાં
નાભ્યુપગમ્યતે, તૈસ્તેષાં તન્નિમિત્તતા તાવદવશ્યમભ્યુપગન્તવ્યા ।
તથાપ્યત્ર શ્લોકે ન વિરોધઃ । યસ્માદનૂદ્યમાનાઙ્ગનિમિત્તોભયરસવસ્તુ-
સહકારિણો વિધીયમાનાંશાદ્ભાવવિશેષપ્રતીતિરુત્પદ્યતે તતશ્ચ ન
કશ્ચિદ્વિરોધઃ । દૃશ્યતે હિ વિરુદ્ધોભયસહકારિણઃ કારણાત્કાર્યવિશેષો-
ત્પત્તિઃ । વિરુદ્ધફલોત્પાદનહેતુત્વં હિ યુગપદેકસ્ય કારણસ્ય વિરુદ્ધં
ન તુ વિરુદ્ધોભયસહકારિત્વમ્ । એવંવિધવિરુદ્ધપદાર્થવિષયઃ કથમભિનયઃ
પ્રયોક્તવ્ય ઇતિ ચેત્, અનૂદ્યમાનૈવંવિધવાચ્યવિષયે યા વાર્તા સાત્રાપિ
ભવિષ્યતિ । એવં વિધ્યનુવાદનયાશ્રયેણાત્ર શ્લોકે પરિહૃતસ્તાવદ્વિરોધઃ ।

કિં ચ નાયકસ્યાભિનન્દનીયોદયસ્ય કસ્યચિત્પ્રભાવાતિશય-
વર્ણને તત્પ્રતિપક્ષાણાં યઃ કરુણો રસઃ સ પરીક્ષકાણાં ન વૈક્લવ્યમાદ-
ધાતિ પ્રત્યુત પ્રીત્યતિશયનિમિત્તતાં પ્રતિપદ્યત ઇત્યતસ્તસ્ય કુણ્ઠશક્તિ-
કત્વાત્તદ્વિરોધવિધાયિનો ન કશ્ચિદ્દોષઃ । તસ્માદ્વાક્યાર્થીભૂતસ્ય
રસસ્ય ભાવસ્ય વા વિરોધી રસવિરોધીતિ વક્તું ન્યાય્યઃ, ન ત્વઙ્ગ-
ભૂતસ્ય કસ્યચિત્ ।
અથવા વાક્યાર્થીભૂતસ્યાપિ કસ્યચિત્કરુણરસવિષયસ્ય તાદૃશેન
શૃઙ્ગારવસ્તુના ભઙ્ગિવિશેષાશ્રયેણ સંયોજનં રસપરિપોષાયૈવ જાયતે ।
યતઃ પ્રકૃતિમધુરાઃ પદાર્થાઃ શોચનીયતાં પ્રાપ્તાઃ પ્રાગવસ્થાભાવિભિઃ
સંસ્મર્યમાણૈર્વિલાસૈરધિકતરં શોકાવેશમુપજનયન્તિ । યથા —
અયં સ રશનોત્કર્ષી પીનસ્તનવિમર્દનઃ ।
નાભ્યૂરુજઘનસ્પર્શી નીવીવિસ્રંસનઃ કરઃ ॥

ઇત્યાદૌ । તદત્ર ત્રિપુરયુવતીનાં શામ્ભવઃ શરાગ્નિરાર્દ્રાપરાધઃ
કામી યથા વ્યવહરતિ સ્મ તથા વ્યવહૃતવાનિત્યનેનાપિ પ્રકારેણાસ્ત્યેવ
નિર્વિરોધત્વમ્ । તસ્માદ્યથા યથા નિરુપ્યતે તથા તથાત્ર દોષાભાવઃ ।
ઇત્થં ચ —
ક્રામન્ત્યઃ ક્ષતકોમલાઙ્ગુલિગલદ્રક્તૈઃ સદર્ભાઃ સ્થલીઃ
પાદૈઃ પાતિતયાવકૈરિવ પતદ્બાષ્પામ્બુધૌતાનનાઃ ।
ભીતા ભર્તૃકરાવલમ્બિતકરાસ્ત્વદ્વૈરિનાથોઽધુના
દાવાગ્નિં પરિતો ભ્રમન્તિ પુનરપ્યુદ્યદ્વિવાહા ઇવ ॥

ઇત્યેવમાદીનાં સર્વેષામેવ નિર્વિરોધત્વમવગન્તવ્યમ્ ।
એવં તાવદ્રસાદીનાં વિરોધિરસાદિભિઃ સમાવેશાસમાવેશયોર્વિષય-
વિભાગો દર્શિતઃ ॥ ૨૦॥

ઇદાનીં તેષામેકપ્રબન્ધવિનિવેશને ન્યાય્યો યઃ ક્રમસ્તં પ્રતિપાદયિતુ-
મુચ્યતે —
પ્રસિદ્ધેઽપિ પ્રબન્ધાનાં નાનારસનિબન્ધને ।
એકો રસોઽઙ્ગીકર્તવ્યસ્તેષામુત્કર્ષમિચ્છતા ॥ ૨૧॥

પ્રબન્ધેષુ મહાકાવ્યાદિષુ નાટકાદિષુ વા વિપ્રકીર્ણતયાઙ્ગાઙ્ગિભાવેન
બહવો રસા ઉપનિબધ્યન્ત ઇત્યત્ર પ્રસિદ્ધૌ સત્યામપિ યઃ પ્રબન્ધાનાં

છાયાતિશયયોગમિચ્છતિ તેન તેષાં રસાનામન્યતમઃ કશ્ચિદ્વિવક્ષિતો
રસોऽઙ્ગિત્વેન વિનિવેશયિતવ્ય ઇત્યયં યુક્તતરો માર્ગઃ ॥ ૨૧॥

નનુ રસાન્તરેષુ બહુષુ પ્રાપ્તપરિપોષેષુ સત્સુ કથમેકસ્યાઙ્ગિતા ન
વિરુધ્યત ઇત્યાશઙ્ક્યેદમુચ્યતે —
રસાન્તરસમાવેશઃ પ્રસ્તુતસ્ય રસસ્ય યઃ ।
નોપહન્ત્યઙ્ગિતાં સોऽસ્ય સ્થાયિત્વેનાવભાસિનઃ ॥ ૨૨॥

પ્રબન્ધેષુ પ્રથમતરં પ્રસ્તુતઃ સન્ પુનઃ પુનરનુસન્ધીયમાનત્વેન
સ્થાયી યો રસસ્તસ્ય સકલબન્ધવ્યાપિનો રસાન્તરૈરન્તરાલવર્તિભિઃ
સમાવેશો યઃ સ નાઙ્ગિતામુપહન્તિ ।
એતદેવોપપાદયિતુમુચ્યતે —
કાર્યમેકં યથા વ્યાપિ પ્રબન્ધસ્ય વિધીયતે ।
તથા રસસ્યાપિ વિધૌ વિરોધો નૈવ વિદ્યતે ॥ ૨૩॥

સન્ધ્યાદિમયસ્ય પ્રબન્ધશરીરસ્ય યથા કાર્યમેકમનુયાયિ વ્યાપકં
કલ્પ્યતે ન ચ તત્કાર્યાન્તરૈર્ન સઙ્કીર્યતે, ન ચ તૈઃ સઙ્કીર્યમાણસ્યાપિ
તસ્ય પ્રાધાન્યમપચીયતે, તથૈવ રસસ્યાપ્યેકસ્ય સન્નિવેશે ક્રિયમાણે
વિરોધો ન કશ્ચિત્ । પ્રત્યુત પ્રત્યુદિતવિવેકાનામનુસન્ધાનવતાં સચેતસાં
તથાવિધે વિષયે પ્રહ્લાદાતિશયઃ પ્રવર્તતે ॥ ૨૩॥

નનુ યેષાં રસાનાં પરસ્પરાવિરોધઃ યથા — વીરશૃઙ્ગારયોઃ શૃઙ્ગાર-
હાસ્યયોઃ રૌદ્રશૃઙ્ગારયોર્વીરાદ્ભુતયોર્વીરરૌદ્રયો રૌદ્રકરુણયોઃ શૃઙ્ગારાદ્ભુત-
યોર્વા તત્ર ભવત્વઙ્ગાઙ્ગિભાવઃ । તેષાં તુ સ કથં ભવેદ્યેષાં પરસ્પરં બાધ્ય-
બાધકભાવઃ । યથા — શૃઙ્ગારબીભત્સયોર્વીરભયાનકયોઃ શાન્તરૌદ્રયોઃ
શન્તશૃઙ્ગારયોર્વા ઇત્યાશઙ્ક્યેદમુચ્યતે —
અવિરોધી વિરોધી વા રસોऽઙ્ગિનિ રસાન્તરે ।
પરિપોષં ન નેતવ્યસ્તથા સ્યાદવિરોધિતા ॥ ૨૪॥

અઙ્ગિનિ રસાન્તરે શૃઙ્ગારાદૌ પ્રબન્ધવ્યઙ્ગ્યે સતિ અવિરોધી વિરોધી
વા રસઃ પરિપોષં ન નેતવ્યઃ । તત્રાવિરોધિનો રસસ્યાઙ્ગિરસાપેક્ષયા-
ત્યન્તમાધિક્યં ન કર્તવ્યમિત્યયં પ્રથમઃ પરિપોષપરિહારઃ । ઉત્કર્ષ-
સામ્યેऽપિ તયોર્વિરોધાસમ્ભવાત્ ।
યથા —
એકતો રોદિતિ પ્રિયા અન્યતઃ સમરતૂર્યનિર્ઘોષઃ ।

સ્નેહેન રણરસેન ચ ભટસ્ય દોલાયિતં હૃદયમ્ ।
યથા વા —
કણ્ઠાચ્છિત્વાક્ષમાલાવલયમિવ કરે હારમાવર્તયન્તી
કૃત્વા પર્યઙ્કબન્ધં વિષધરપતિના મેખલાયા ગુણેન ।
મિથ્યામન્ત્રાભિજાપસ્ફુરદધરપુટવ્યઞ્જિતાવ્યક્તહાસા
દેવી સન્ધ્યાભ્યસૂયાહસિતપશુપતિસ્તત્ર દૃષ્ટા તુ વોઽવ્યાત્ ॥

ઇત્યત્ર ।
અઙ્ગિરસવિરુદ્ધાનાં વ્યભિચારિણાં પ્રાચુર્યેણાનિવેશનમ્, નિવેશને
વા ક્ષિપ્રમેવાઙ્ગિરસવ્યભિચાર્યનુવૃત્તિરિતિ દ્વિતીયઃ ।
અઙ્ગત્વેન પુનઃ પુનઃ પ્રત્યવેક્ષા પરિપોષં નીયમાનસ્યાપ્યઙ્ગભૂતસ્ય
રસસ્યેતિ તૃતીયઃ । અનયા દિશાન્યેઽપિ પ્રકારા ઉત્પ્રેક્ષણીયાઃ ।
વિરોધિનસ્તુ રસસ્યાઙ્ગિરસાપેક્ષયા કસ્યચિન્ન્યૂનતા સમ્પાદનીયા ।
યથા શાન્તેઽઙ્ગિનિ શ‍ૃઙ્ગારસ્ય શ‍ૃઙ્ગારે વા શાન્તસ્ય । પરિપોષરહિતસ્ય
રસસ્ય કથં રસત્વમિતિ ચેત્ — ઉક્તમત્રાઙ્ગિરસાપેક્ષયેતિ । અઙ્ગિનો હિ
રસસ્ય યાવાન્ પરિપોષસ્તાવાંસ્તસ્ય ન કર્તવ્યઃ, સ્વતસ્તુ સમ્ભવી
પરિપોષઃ કેન વાર્યતે । એતચ્ચાપેક્ષિકં પ્રકર્ષયોગિત્વમેકસ્ય રસસ્ય
બહુરસેષુ પ્રબન્ધેષુ રસાનામઙ્ગાઙ્ગિભાવમનભ્યુપગચ્છતાપ્યશક્યપ્રતિક્ષેપ-
મિત્યનેન પ્રકારેણાવિરોધિનાં વિરોધિનાં ચ રસાનામઙ્ગાઙ્ગિભાવેન સમાવેશે
પ્રબન્ધેષુ સ્યાદવિરોધઃ । એતચ્ચ સર્વં યેષાં રસો રસાન્તરસ્ય વ્યભિચારી-
ભવતિ ઇતિ દર્શનં તન્મતેનોચ્યતે । મતાન્તરેઽપિ રસાનાં સ્થાયિનો
ભાવા ઉપચારાદ્રસશબ્દેનોક્તાસ્તેષામઙ્ગત્વં નિર્વિરોધમેવ ॥ ૨૪॥

એવમવિરોધિનાં વિરોધિનાં ચ પ્રબન્ધસ્થેનાઙ્ગિના રસેન સમાવેશે
સાધારણમવિરોધોપાયં પ્રતિપાદ્યેદાનીં વિરોધિવિષયમેવ તં પ્રતિપાદ-
યિતુમિદમુચ્યતે —
વિરુદ્ધૈકાશ્રયો યસ્તુ વિરોધી સ્થાયિનો ભવેત્ ।
સ વિભિન્નાશ્રયઃ કાર્યસ્તસ્ય પોષેઽપ્યદોષતા ॥ ૨૫॥

એકાધિકરણ્યવિરોધી નૈરન્તર્યવિરોધી ચેતિ દ્વિવિધો વિરોધી ।
તત્ર પ્રબન્ધસ્થેન સ્થાયિનાઙ્ગિના રસેનૌચિત્યાપેક્ષયા વિરુદ્ધૈકાશ્રયો
યો વિરોધી યથા વીરેણ ભયાનકઃ સ વિભિન્નાશ્રયઃ કાર્યઃ । તસ્ય
વીરસ્ય ય આશ્રયઃ કથાનાયકસ્તદ્વિપક્ષવિષયે સન્નિવેશયિતવ્યઃ ।
તથા સતિ ચ તસ્ય વિરોધિનોઽપિ યઃ પરિપોષઃ સ નિર્દોષઃ । વિપક્ષ-

વિષયે હિ ભયાતિશયવર્ણને નાયકસ્ય નયપરાક્રમાદિસમ્પત્સુતરામુ-
દ્યોતિતા ભવતિ । એતચ્ચ મદીયેઽર્જુનચરિતેઽર્જુનસ્ય પાતાલાવતરણ-
પ્રસઙ્ગે વૈશદ્યેન પ્રદર્શિતમ્ ।

એવમૈકાધિકરણ્યવિરોધિનઃ પ્રબન્ધસ્થેન સ્થાયિના રસેનાઙ્ગભાવ-
ગમને નિર્વિરોધત્વં યથા તથા તદ્દર્શિતમ્ । દ્વિતીયસ્ય તુ તત્પ્રતિપાદ-
યિતુમુચ્યતે —

એકાશ્રયત્વે નિર્દોષો નૈરન્તર્યે વિરોધવાન્ ।
રસાન્તરવ્યવધિના રસો વ્યઙ્ગ્યઃ સુમેધસા ॥ ૨૬॥

યઃ પુનરેકાધિકરણત્વે નિર્વિરોધો નૈરન્તર્યે તુ વિરોધી સ રસાન્ત-
રવ્યવધાનેન પ્રબન્ધે નિવેશયિતવ્યઃ । યથા શાન્તશૃઙ્ગારૌ નાગાનન્દે
નિવેશિતૌ ।

શાન્તશ્ચ તૃષ્ણાક્ષયસુખસ્ય યઃ પરિપોષસ્તલ્લક્ષણો રસઃ પ્રતીયત
એવ । તથા ચોક્તમ્ —

યચ્ચ કામસુખં લોકે યચ્ચ દિવ્યં મહત્સુખમ્ ।
તૃષ્ણાક્ષયસુખસ્યૈતે નાર્હતઃ ષોડશીં કલામ્ ॥

યદિ નામ સર્વજનાનુભવગોચરતા તસ્ય નાસ્તિ નૈતાવતાસા-
વલોકસામાન્યમહાનુભાવચિત્તવૃત્તિવિશેષઃ પ્રતિક્ષેપ્તું શક્યઃ । ન ચ
વીરે તસ્યાન્તર્ભાવઃ કર્તું યુક્તઃ । તસ્યાભિમાનમયત્વેન વ્યવસ્થાપનાત્ ।
અસ્ય ચાહઙ્કારપ્રશમૈકરૂપતયા સ્થિતેઃ । તયોશ્ચૈવંવિધવિશેષસદ્ભાવેઽપિ
યદ્યૈક્યં પરિકલ્પ્યતે તદ્વીરરૌદ્રયોરપિ તથા પ્રસઙ્ગઃ । દયાવીરાદીનાં
ચ ચિત્તવૃત્તિવિશેષાણાં સર્વાકારમહઙ્કારરહિતત્વેન શાન્તરસપ્રભેદત્વમ્,
ઇતરથા તુ વીરપ્રભેદત્વમિતિ વ્યવસ્થાપ્યમાને ન કશ્ચિદ્વિરોધઃ ।
તદેવમસ્તિ શાન્તો રસઃ । તસ્ય ચાવિરુદ્ધરસવ્યવધાનેન પ્રબન્ધે વિરોધિ-
રસસમાવેશે સત્યપિ નિર્વિરોધત્વમ્ । યથા પ્રદર્શિતે વિષયે ।

એતદેવ સ્થિરીકર્તુમિદમુચ્યતે —

રસાન્તરાન્તરિતયોરેકવાક્યસ્થયોરપિ ।
નિવર્તતે હિ રસયોઃ સમાવેશે વિરોધિતા ॥ ૨૭॥

રસાન્તરવ્યવહિતયોરેકપ્રબન્ધસ્થયોર્વિરોધિતા નિવર્તત ઇત્યત્ર ન
કાચિદ્ભ્રાન્તિઃ । યસ્માદેકવાક્યસ્થયોરપિ રસયોરુક્તયા નીત્યા
વિરુદ્ધતા નિવર્તતે । યથા —

ભૂરેણુદિગ્ધાન્નવપારિજાતમાલારજોવાસિતબાહુમધ્યાઃ ।
ગાઢં શિવાભિઃ પરિરભ્યમાણાન્સુરાઙ્ગનાશ્લિષ્ટભુજાન્તરાલાઃ ॥

સશોણિતૈઃ ક્રવ્યભુજાં સ્ફુરદ્ભિઃ પક્ષૈઃ ખગાનામુપવીજ્યમાનાન્ ।
સંવીજિતાશ્ચન્દનવારિસેકૈઃ સુગન્ધિભિઃ કલ્પલતાદુકૂલૈઃ ॥

વિમાનપર્યઙ્કતલે નિષણ્ણાઃ કુતૂહલાવિષ્ટતયા તદાનીમ્ ।
નિર્દિશ્યમાનાંલ્લલનાઙ્ગુલીભિર્વીરાઃ સ્વદેહાન્ પતિતાનપશ્યન્ ॥

ઇત્યાદૌ । અત્ર હિ શૃઙ્ગારબીભત્સયોસ્તદઙ્ગયોર્વા વીરરસવ્યવધાનેન સમાવેશો ન વિરોધી ।

વિરોધમવિરોધં ચ સર્વત્રેત્થં નિરૂપયેત્ ।
વિશેષતસ્તુ શૃઙ્ગારે સુકુમારતમા હ્યસૌ ॥ ૨૮॥

યથોક્તલક્ષણાનુસારેણ વિરોધાવિરોધૌ સર્વેષુ રસેષુ પ્રબન્ધેઽન્યત્ર ચ નિરૂપયેત્સહૃદયઃ; વિશેષતસ્તુ શૃઙ્ગારે । સ હિ રતિપરિપોષાત્મકત્વાદ્ રતેશ્ચ સ્વલ્પેનાપિ નિમિત્તેન ભઙ્ગસમ્ભવાત્સુકુમારતમઃ સર્વેભ્યો રસેભ્યો મનાગપિ વિરોધિસમાવેશં ન સહતે ।

અવધાનાતિશયવાન્ રસે તત્રૈવ સત્કવિઃ ।
ભવેત્તસ્મિન્ પ્રમાદો હિ ઝટિત્યેવોપલક્ષ્યતે ॥ ૨૯॥

તત્રૈવ ચ રસે સર્વેભ્યોઽપિ રસેભ્યઃ સૌકુમાર્યાતિશયયોગિનિ કવિરવધાનવાન્ પ્રયત્નવાન્ સ્યાત્ । તત્ર હિ પ્રમાદ્યતસ્તસ્ય સહૃદયમધ્યે ક્ષિપ્રમેવાવજ્ઞાનવિષયતા ભવતિ । શૃઙ્ગારરસો હિ સંસારિણાં નિયમેના-નુભવવિષયત્વાત્ સર્વરસેભ્યઃ કમનીયતયા પ્રધાનભૂતઃ ।

એવં ચ સતિ —
વિનેયાનુન્મુખીકર્તું કાવ્યશોભાર્થમેવ વા ।
તદ્વિરુદ્ધરસસ્પર્શસ્તદઙ્ગાનાં ન દુષ્યતિ ॥ ૩૦॥

શૃઙ્ગારવિરુદ્ધરસસ્પર્શઃ શૃઙ્ગારાઙ્ગાનાં યઃ સ ન કેવલમવિરોધલક્ષ-ણયોગે સતિ ન દુષ્યતિ યાવદ્વિનેયાનુન્મુખીકર્તું કાવ્યશોભાર્થમેવ વા ક્રિયમાણો ન દુષ્યતિ । શૃઙ્ગારરસાઙ્ગૈરુન્મુખીકૃતાઃ સન્તો હિ વિનેયાઃ સુખં વિનયોપદેશાન્ ગૃહ્ણન્તિ । સદાચારોપદેશરૂપા હિ નાટકાદિગોષ્ઠી વિનેયજનહિતાર્થમેવ મુનિભિરવતારિતા ।
કિં ચ શૃઙ્ગારસ્ય સકલજનમનોહરાભિરામત્વાત્તદઙ્ગસમાવેશઃ

કાવ્યે શોભાતિશયં પુષ્યતીત્યનેનાપિ પ્રકારેણ વિરોધિનિ રસે શૃઙ્ગારા-
ઙ્ગસમાવેશો ન વિરોધી । તતશ્ચ —
સત્યં મનોરમા રામાઃ સત્યં રમ્યા વિભૂતયઃ ।
કિં તુ મત્તાઙ્ગનાપાઙ્ગભઙ્ગલોલં હિ જીવિતમ્ ॥

ઇત્યાદિષુ નાસ્તિ રસવિરોધદોષઃ ।

વિજ્ઞાયેત્થં રસાદીનામવિરોધવિરોધયોઃ ।
વિષયં સુકવિઃ કાવ્યં કુર્વન્મુહ્યતિ ન ક્વચિત્ ॥ ૩૧॥

ઇત્થમનેનાનન્તરોક્તેન પ્રકારેણ રસાદીનાં રસભાવતદાભાસાનાં
પરસ્પરં વિરોધસ્યાવિરોધસ્ય ચ વિષયં વિજ્ઞાય સુકવિઃ કાવ્યવિષયે
પ્રતિભાતિશયયુક્તઃ કાવ્યં કુર્વન્ન ક્વચિન્મુહ્યતિ ।
એવં રસાદિષુ વિરોધાવિરોધનિરૂપણસ્યોપયોગિત્વં પ્રતિપાદ્ય
વ્યઞ્જકવાચ્યવાચકનિરૂપણસ્યાપિ તદ્વિષયસ્ય તત્પ્રતિપાદ્યતે —
વાચ્યાનાં વાચકાનાં ચ યદૌચિત્યેન યોજનમ્ ।
રસાદિવિષયેણૈતત્કર્મ મુખ્યં મહાકવેઃ ॥ ૩૨॥

વાચ્યાનામિતિવૃત્તવિશેષાણાં વાચકાનાં ચ તદ્વિષયાણાં રસાદિ-
વિષયેણૌચિત્યેન યદ્યોજનમેતન્મહાકવેર્મુખ્યં કર્મ । અયમેવ હિ મહાક-
વેર્મુખ્યો વ્યાપારો યદ્રસાદીનામેવ મુખ્યતયા કાવ્યાર્થીકૃત્ય તદ્વ્યક્ત્ય-
નુગુણત્વેન શબ્દાનામર્થાનાં ચોપનિબન્ધનમ્ ।

એતચ્ચ રસાદિતાત્પર્યેણ કાવ્યનિબન્ધનં ભરતાદાવપિ સુપ્રસિદ્ધ-
મેવેતિ પ્રતિપાદયિતુમાહ —
રસાદ્યનુગુણત્વેન વ્યવહારોઽર્થશબ્દયોઃ ।
ઔચિત્યવાન્યસ્તા એતા વૃત્તયો દ્વિવિધાઃ સ્થિતાઃ ॥ ૩૩॥

વ્યવહારો હિ વૃત્તિરિત્યુચ્યતે । તત્ર રસાનુગુણ ઔચિત્યવાન્
વાચ્યાશ્રયો યો વ્યવહારસ્તા એતાઃ કૈશિક્યાદ્યા વૃત્તયઃ । વાચકાશ્રયા-
શ્ચોપનાગરિકાદ્યાઃ । વૃત્તયો હિ રસાદિતાત્પર્યેણ સંનિવેશિતાઃ કામપિ
નાટ્યસ્ય કાવ્યસ્ય ચ છાયામાવહન્તિ । રસાદયો હિ દ્વયોરપિ
તયોર્જીવભૂતાઃ । ઇતિવૃત્તાદિ તુ શરીરભૂતમેવ ।
અત્ર કેચિદાહુઃ —“ગુણગુણિવ્યવહારો રસાદીનામિતિવૃત્તાદિભિઃ
સહ યુક્તઃ, ન તુ જીવશરીરવ્યવહારઃ । રસાદિમયં હિ વાચ્યં પ્રતિભાસતે
ન તુ રસાદિભિઃ પૃથગ્ભૂતમ્”ઇતિ । અત્રોચ્યતે — યદિ રસાદિમયમેવ

વાચ્યં યથા ગૌરત્વમયં શરીરમ્ । એવં સતિ યથા શરીરે પ્રતિભાસમાને નિયમેનૈવ ગૌરત્વં પ્રતિભાસતે સર્વસ્ય તથા વાચ્યેન સહૈવ રસાદયોઽપિ સહૃદયસ્યાસહૃદયસ્ય ચ પ્રતિભાસેરન્ । ન ચૈવમ્; તથા ચૈતત્પ્રતિપાદિ- તમેવ પ્રથમોદ્દ્યોતે ।

સ્યાન્મતમ્ ; રત્નાનામિવ જાત્યત્વં પ્રતિપત્તૃવિશેષતઃ સંવેદ્યં વાચ્યાનાં રસાદિરૂપત્વમિતિ । નૈવમ્ ; યતો યથા જાત્યત્વેન પ્રતિભાસમાને રત્ને રત્નસ્વરૂપાનતિરિક્તત્વમેવ તસ્ય લક્ષ્યતે તથા રસાદીનામપિ વિભાવા- નુભાવાદિરૂપવાચ્યાવ્યતિરિક્તત્વમેવ લક્ષ્યેત । ન ચૈવમ્; ન હિ વિભાવાનુભાવવ્યભિચારિણ એવ રસા ઇતિ કસ્યચિદવગમઃ । અત એવ ચ વિભાવાદિપ્રતીત્યવિનાભાવિની રસાદીનાં પ્રતીતિરિતિ તત્પ્રતીત્યોઃ કાર્યકારણભાવેન વ્યવસ્થાનાત્ક્રમોઽવશ્યમ્ભાવી । સ તુ લાઘવાન્ન પ્રકાશ્યતે“ઇત્યલક્ષ્યક્રમા એવ સન્તો વ્યઙ્ગ્યા રસાદયઃ”ઇત્યુક્તમ્ ।

નનુ શબ્દ એવ પ્રકરણાદ્યવચ્છિન્નો વાચ્યવ્યઙ્ગ્યયોઃ સમમેવ પ્રતીતિમુપજનયતીતિ કિં તત્ર ક્રમકલ્પનયા । ન હિ શબ્દસ્ય વાચ્ય- પ્રતીતિપરામર્શ એવ વ્યઞ્જકત્વે નિબન્ધનમ્ । તથા હિ ગીતાદિશબ્દેભ્યો- ઽપિ રસાભિવ્યક્તિરસ્તિ । ન ચ તેષામન્તરા વાચ્યપરામર્શઃ । અત્રાપિ બ્રૂમઃ — પ્રકરણાદ્યવચ્છેદેન વ્યઞ્જકત્વં શબ્દાનામિત્યનુમતમેવૈતદસ્મા- કમ્ । કિં તુ તદ્વ્યઞ્જકત્વં તેષાં કદાચિત્સ્વરૂપવિશેષનિબન્ધનં કદાચિ- દ્વાચકશક્તિનિબન્ધનમ્ । તત્ર યેષાં વાચકશક્તિનિબન્ધનં તેષાં યદિ વાચ્યપ્રતીતિમન્તરેણૈવ સ્વરૂપપ્રતીત્યા નિષ્પન્નં તદ્ભવેન્ન તર્હિ વાચક- શક્તિનિબન્ધનમ્ । અથ તન્નિબન્ધનં તન્નિયમેનૈવ વાચ્યવાચકભાવ- પ્રતીત્યુત્તરકાલત્વં વ્યઙ્ગ્યપ્રતીતેઃ પ્રાપ્તમેવ ।

સ તુ ક્રમો યદિ લાઘવાન્ન લક્ષ્યતે તત્કિં ક્રિયતે । યદિ ચ વાચ્યપ્રતીતિમન્તરેણૈવ પ્રકરણાદ્યવચ્છિન્નશબ્દમાત્રસાધ્યા રસાદિપ્રતીતિઃ સ્યાત્તદનવધારિતપ્રકરણાનાં વાચ્યવાચકભાવે ચ સ્વયમવ્યુત્પન્નાનાં પ્રતિપત્તૃણાં કાવ્યમાત્રશ્રવણાદેવાસૌ ભવેત્ । સહભાવે ચ વાચ્યપ્રતીતે- રનુપયોગઃ, ઉપયોગે વા ન સહભાવઃ । યેષામપિ સ્વરૂપવિશેષપ્રતીતિ- નિમિત્તં વ્યઞ્જકત્વં યથા ગીતાદિશબ્દાનાં તેષામપિ સ્વરૂપપ્રતીતેર્વ્યઙ્ગ્ય- પ્રતીતેશ્ચ નિયમભાવી ક્રમઃ । તત્તુ શબ્દસ્ય ક્રિયાપૌર્વાપર્યમનન્યસાધ્ય- તત્ફલઘટનાસ્વાશુભાવિનીષુ વાચ્યેનાવિરોધિન્યભિધેયાન્તરવિલક્ષણે રસાદૌ ન પ્રતીયતે ।

ક્વચિત્તુ લક્ષ્યત એવ । યથાનુરણનરૂપવ્યઙ્ગ્યપ્રતીતિષુ । તત્રાપિ
કથમિતિ ચેદુચ્યતે — અર્થશક્તિમૂલાનુરણનરૂપવ્યઙ્ગ્યે ધ્વનૌ તાવદ-
ભિધેયસ્ય તત્સામર્થ્યાક્ષિપ્તસ્ય ચાર્થસ્યાભિધેયાન્તરવિલક્ષણતયાત્યન્ત-
વિલક્ષણે યે પ્રતીતી તયોરશક્યનિહ્નવો નિમિત્તનિમિત્તિભાવ ઇતિ
સ્ફુટમેવ તત્ર પૌર્વાપર્યમ્ । યથા પ્રથમોદ્યોતે પ્રતીયમાનાર્થસિદ્ધ્યર્થ-
મુદાહૃતાસુ ગાથાસુ । તથાવિધે ચ વિષયે વાચ્યવ્યઙ્ગ્યયોરત્યન્ત-
વિલક્ષણત્વાદ્યૈવ એકસ્ય પ્રતીતિઃ સૈવેતરસ્યેતિ ન શક્યતે વક્તુમ્ ।
શબ્દશક્તિમૂલાનુરણનરૂપવ્યઙ્ગ્યે તુ ધ્વનૌ —
ગાવો વઃ પાવનાનાં પરમપરિમિતાં પ્રીતિમુત્પાદયન્તુ
ઇત્યાદાવર્થદ્વયપ્રતીતૌ શાબ્દ્યામર્થદ્વયસ્યોપમાનોપમેયભાવપ્રતીતિ-
રુપમાવાચકપદવિરહે સત્યર્થસામર્થ્યાદાક્ષિપ્તેતિ, તત્રાપિ સુલક્ષમભિધેય-
વ્યઙ્ગ્યાલઙ્કારપ્રતીત્યોઃ પૌર્વાપર્યમ્ ।
પદપ્રકાશશબ્દશક્તિમૂલાનુરણનરૂપવ્યઙ્ગ્યેઽપિ ધ્વનૌ વિશેષણપદ-
સ્યોભયાર્થસમ્બન્ધયોગ્યસ્ય યોજકં પદમન્તરેણ યોજનમશાબ્દમપ્યર્થા-
દવસ્થિતમિત્યત્રાપિ પૂર્વવદભિધેયતત્સામર્થ્યાક્ષિપ્તાલઙ્કારમાત્રપ્રતીત્યોઃ
સુસ્થિતમેવ પૌર્વાપર્યમ્ । આર્થ્યપિ ચ પ્રતિપત્તિસ્તથાવિધે વિષયે
ઉભયાર્થસમ્બન્ધયોગ્યશબ્દસામર્થ્યપ્રસાવિતેતિ શબ્દશક્તિમૂલા કલ્પ્યતે ।
અવિવક્ષિતવાચ્યસ્ય તુ ધ્વનેઃ પ્રસિદ્ધસ્વવિષયવૈમુખ્યપ્રતીતિપૂર્વકમેવાર્થા-
ન્તરપ્રકાશનમિતિ નિયમભાવી ક્રમઃ । તત્રાવિવક્ષિતવાચ્યત્વાદેવ
વાચ્યેન સહ વ્યઙ્ગ્યસ્ય ક્રમપ્રતીતિવિચારો ન કૃતઃ ।
તસ્માદભિધાનાભિધેયપ્રતીત્યોરિવ વાચ્યવ્યઙ્ગ્યપ્રતીત્યોર્નિમિત્તનિ-
મિત્તિભાવાન્નિયમભાવી ક્રમઃ । સ તૂક્તયુક્ત્યા ક્વચિલ્લક્ષ્યતે ક્વચિન્ન
લક્ષ્યતે ।
તદેવં વ્યઞ્જકમુખેન ધ્વનિપ્રકારેષુ નિરૂપિતેષુ કશ્ચિદ્બ્રૂયાત્ —
કિમિદં વ્યઞ્જકત્વં નામ વ્યઙ્ગ્યાર્થપ્રકાશનમ્ , ન હિ વ્યઞ્જકત્વં
વ્યઙ્ગ્યત્વં ચાર્થસ્ય વ્યઞ્જકસિદ્ધ્યધીનં વ્યઙ્ગ્યત્વમ્, વ્યઙ્ગ્યાપેક્ષયા ચ
વ્યઞ્જકત્વસિદ્ધિરિત્યન્યોન્યસંશ્રયાદવ્યવસ્થાનમ્ । નનુ વાચ્યવ્યતિ-
રિક્તસ્ય વ્યઙ્ગ્યસ્ય સિદ્ધિઃ પ્રાગેવ પ્રતિપાદિતા તત્સિદ્ધ્યધીના ચ
વ્યઞ્જકસિદ્ધિરિતિ કઃ પર્યનુયોગાવસરઃ । સત્યમેવૈતત્; પ્રાગુક્તયુક્તિ-
ભિર્વાચ્યવ્યતિરિક્તસ્ય વસ્તુનઃ સિદ્ધિઃ કૃતા, સ ત્વર્થો વ્યઙ્ગ્યતયૈવ
કસ્માદ્વ્યપદિશ્યતે યત્ર ચ પ્રાધાન્યેનાનવસ્થાનં તત્ર વાચ્યતયૈવાસૌ
વ્યપદેષ્ટું યુક્તઃ, તત્પરત્વાદ્વાક્યસ્ય । અતશ્ચ તત્પ્રકાશિનો વાક્યસ્ય

વાચકત્વમેવ વ્યાપારઃ । કિં તસ્ય વ્યાપારાન્તરકલ્પનયા ? તસ્માત્તાત્પર્યવિષયો યોઽર્થઃ સ તાવન્મુખ્યતયા વાચ્યઃ । યા ત્વન્તરા તથાવિધે વિષયે વાચ્યાન્તરપ્રતીતિઃ સા તત્પ્રતીતેરુપાયમાત્રં પદાર્થપ્રતીતિરિવ વાક્યાર્થપ્રતીતેઃ ।

અત્રોચ્યતે — યત્ર શબ્દઃ સ્વાર્થમભિદધાનોઽર્થાન્તરમવગમયતિ તત્ર યત્તસ્ય સ્વાર્થાભિધાયિત્વં યચ્ચ તદર્થાન્તરાવગમહેતુત્વં તયોરવિશેષો વિશેષો વા । ન તાવદવિશેષઃ; યસ્માત્તૌ દ્વૌ વ્યાપારૌ ભિન્નવિષયૌ ભિન્નરૂપૌ ચ પ્રતીયેતે એવ । તથાહિ વાચકત્વલક્ષણો વ્યાપારઃ શબ્દસ્ય સ્વાર્થવિષયઃ ગમકત્વલક્ષણસ્ત્વર્થાન્તરવિષયઃ । ન ચ સ્વપરવ્યવહારો વાચ્યવ્યઙ્ગ્યયોરપહ્નોતું શક્યઃ, એકસ્ય સમ્બન્ધિત્વેન પ્રતીતેરપરસ્ય સમ્બન્ધિસમ્બન્ધિત્વેન । વાચ્યો હ્યર્થઃ સાક્ષાચ્છબ્દસ્ય સમ્બન્ધી તદિતરસ્ત્વભિધેયસામર્થ્યાક્ષિપ્તઃ સમ્બન્ધિસમ્બન્ધી । યદિ ચ સ્વસમ્બન્ધિત્વં સાક્ષાત્તસ્ય સ્યાત્તદાર્થાન્તરત્વવ્યવહાર એવ ન સ્યાત્ । તસ્માદ્વિષયભેદસ્તાવત્તયોર્વ્યાપારયોઃ સુપ્રસિદ્ધઃ । રૂપભેદોઽપિ પ્રસિદ્ધ એવ । ન હિ યૈવાભિધાનશક્તિઃ સૈવાવગમનશક્તિઃ । અવાચકસ્યાપિ ગીતશબ્દાદે રસાદિલક્ષણાર્થાવગમદર્શનાત્ । અશબ્દસ્યાપિ ચેષ્ટાદેરર્થવિશેષપ્રકાશનપ્રસિદ્ધેઃ । તથા હિ“વ્રીડાયોગાન્નતવદનયા”ઇત્યાદિશ્લોકે ચેષ્ટાવિશેષઃ સુકવિનાર્થપ્રકાશનહેતુઃ પ્રદર્શિત એવ । તસ્માદ્ભિન્નવિષયત્વાદ્ભિન્નરૂપત્વાચ્ચ સ્વાર્થાભિધાયિત્વમર્થાન્તરાવગમહેતુત્વં ચ શબ્દસ્ય યત્તયોઃ સ્પષ્ટ એવ ભેદઃ । વિશેષશ્ચેન્ન તર્હીદાનીમવગમનસ્યાભિધેયસામર્થ્યાક્ષિપ્તસ્યાર્થાન્તરસ્ય વાચ્યત્વવ્યપદેશ્યતા । શબ્દવ્યાપારગોચરત્વં તુ તસ્યાસ્માભિરિષ્યત એવ, તત્તુ વ્યઙ્ગ્યત્વેનૈવ ન વાચ્યત્વેન । પ્રસિદ્ધાભિધાનાન્તરસમ્બન્ધયોગ્યત્વેન ચ તસ્યાર્થાન્તરસ્ય પ્રતીતેઃ શબ્દાન્તરેણ સ્વાર્થાભિધાયિના યદ્વિષયીકરણં તત્ર પ્રકાશનોક્તિરેવ યુક્તા ।

ન ચ પદાર્થવાક્યાર્થન્યાયો વાચ્યવ્યઙ્ગ્યયોઃ । યતઃ પદાર્થપ્રતીતિરસત્યૈવેતિ કૈશ્ચિદ્વિદ્વદ્ભિરાસ્થિતમ્ । યૈરપ્યસત્યત્વમસ્યા નાભ્યુપેયતે તૈર્વાક્યાર્થપદાર્થયોર્ઘટતદુપાદાનકારણન્યાયોઽભ્યુપગન્તવ્યઃ । યથાહિ ઘટે નિષ્પન્ને તદુપાદાનકારણાનાં ન પૃથગુપલમ્ભસ્તથૈવ વાક્યે તદર્થે વા પ્રતીતે પદતદર્થાનાં તેષાં તદા વિભક્તતયોપલમ્ભે વાક્યાર્થબુદ્ધિરેવ દૂરીભવેત્। ન ત્વેષ વાચ્યવ્યઙ્ગ્યયોર્ન્યાયઃ, ન હિ વ્યઙ્ગ્યે પ્રતીયમાને વાચ્યબુદ્ધિર્દૂરીભવતિ, વાચ્યાવભાસાવિનાભાવેન તસ્ય પ્રકાશનાત્ ।

તસ્માદ્ ઘટપ્રદીપન્યાયસ્તયોઃ, યથૈવ હિ પ્રદીપદ્વારેણ ઘટપ્રતીતાવુત્પન્ના-યાં ન પ્રદીપપ્રકાશો નિવર્તતે તદ્વ્યઙ્ગ્યપ્રતીતૌ વાચ્યાવભાસઃ । યત્તુ પ્રથમોદ્યોતે"યથા પદાર્થદ્વારેણ"ઇત્યાદ્યુક્તં તદુપાયત્વમાત્રાત્સામ્ય-વિવક્ષયા ।

નન્વેવં યુગપદર્થદ્વયયોગિત્વં વાક્યસ્ય પ્રાપ્તં તદ્ભાવે ચ તસ્ય વા-ક્યતૈવ વિઘટતે, તસ્યા ઐકાર્થ્યલક્ષણત્વાત્ ; નૈષ દોષઃ ; ગુણપ્રધાનભા-વેન તયોર્વ્યવસ્થાનાત્ । વ્યઙ્ગ્યસ્ય હિ ક્વચિત્પ્રાધાન્યં વાચ્યસ્યોપસ-ર્જનભાવઃ ક્વચિદ્વાચ્યસ્ય પ્રાધાન્યમપરસ્ય ગુણભાવઃ । તત્ર વ્યઙ્ગ્યપ્રા-ધાન્યે ધ્વનિરિત્યુક્તમેવ ; વાચ્યપ્રાધાન્યે તુ પ્રકારાન્તરં નિર્દેક્ષ્યતે । તસ્માત્ સ્થિતમેતત્ — વ્યઙ્ગ્યપરત્વેઽપિ કાવ્યસ્ય ન વ્યઙ્ગ્યસ્યાભિધે-યત્વમપિ તુ વ્યઙ્ગ્યત્વમેવ ।

કિં ચ વ્યઙ્ગ્યસ્ય પ્રાધાન્યેનાવિવક્ષાયાં વાચ્યત્વં તાવદ્ભવદ્ભિર્ના-ભ્યુપગન્તવ્યમતત્પરત્વાચ્છબ્દસ્ય । તદસ્તિ તાવદ્વ્યઙ્ગ્યઃ શબ્દાનાં કશ્ચિ-દ્વિષય ઇતિ । યત્રાપિ તસ્ય પ્રાધાન્યં તત્રાપિ કિમિતિ તસ્ય સ્વરૂપમ-પહ્નૂયતે । એવં તાવદ્વાચકત્વાદન્યદેવ વ્યઞ્જકત્વમ્ ; ઇતશ્ચ વાચકત્વા-દ્વ્યઞ્જકત્વસ્યાન્યત્વં યદ્વાચકત્વં શબ્દૈકાશ્રયમિતરત્તુ શબ્દાશ્રયમર્થાશ્રયં ચ શબ્દાર્થયોર્દ્વયોરપિ વ્યઞ્જકત્વસ્ય પ્રતિપાદિતત્વાત્ ।
ગુણવૃત્તિસ્તૂપચારેણ લક્ષણયા ચોભયાશ્રયાપિ ભવતિ । કિન્તુ તતોઽપિ વ્યઞ્જકત્વં સ્વરૂપતો વિષયતશ્ચ ભિદ્યતે । રૂપભેદસ્તાવદયમ્ – યદમુખ્યતયા વ્યાપારો ગુણવૃત્તિઃ પ્રસિદ્ધા । વ્યઞ્જકત્વં તુ મુખ્યતયૈવ શબ્દસ્ય વ્યાપારઃ । ન હ્યર્થાદ્વ્યઙ્ગ્યત્રયપ્રતીતિર્યા તસ્યા અમુખ્યત્વં મનાગપિ લક્ષ્યતે ।
અયં ચાન્યઃ સ્વરૂપભેદઃ — યદ્ગુણવૃત્તિરમુખ્યત્વેન વ્યવસ્થિતં વાચ-કત્વમેવોચ્યતે । વ્યઞ્જકત્વં તુ વાચકત્વાદત્યન્તં વિભિન્નમેવ । એતચ્ચ પ્રતિપાદિતમ્ । અયં ચાપરો રૂપભેદો યદ્ગુણવૃત્તૌ યદાર્થોઽર્થાન્તરમુપલ-ક્ષયતિ તદોપલક્ષણીયાર્થાત્મના પરિણત એવાસૌ સમ્પદ્યતે । યથા"ગઙ્ગા-યાં ઘોષઃ"ઇત્યાદૌ । વ્યઞ્જકત્વમાર્ગે તુ યદાર્થોઽર્થાન્તરં દ્યોતયતિ તદા સ્વરૂપં પ્રકાશયન્નેવાસાવન્યસ્ય પ્રકાશકઃ પ્રતીયતે પ્રદીપવત્ । યથા — "લીલાકમલપત્રાણિ ગણયામાસ પાર્વતી"ઇત્યાદૌ । યદિ ચ યત્રાતિ-રસ્કૃતસ્વપ્રતીતિરર્થોઽર્થાન્તરં લક્ષયતિ તત્ર લક્ષણાવ્યવહારઃ ક્રિયતે, ત-દેવં સતિ લક્ષણૈવ મુખ્યઃ શબ્દવ્યાપાર ઇતિ પ્રાપ્તમ્ । યસ્માત્પ્રાયેણ

વાક્યાનાં વાચ્યવ્યતિરિક્તતાત્પર્યવિષયાર્થાવભાસિત્વમ્ ।

નનુ ત્વત્પક્ષેઽપિ યદાર્થો વ્યઙ્ગ્યત્રયં પ્રકાશયતિ તદા શબ્દસ્ય કીદૃશો વ્યાપારઃ । ઉચ્યતે — પ્રકરણાદ્યવચ્છિન્નશબ્દવશેનૈવાર્થસ્ય તથાવિધં વ્યઞ્જકત્વમિતિ શબ્દસ્ય તત્રોપયોગઃ કથમપહ્નૂયતે । વિષયભેદોઽપિ ગુણવૃત્તિવ્યઞ્જકત્વયોઃ સ્પષ્ટ એવ । યતો વ્યઞ્જકત્વસ્ય રસાદયોઽલઙ્કારવિશેષા વ્યઙ્ગ્યરૂપાવચ્છિન્નં વસ્તુ ચેતિ ત્રયં વિષયઃ । તત્ર રસાદિપ્રતીતિર્ગુણવૃત્તિરિતિ ન કેનચિદુચ્યતે ન ચ શક્યતે વક્તુમ્ । વ્યઙ્ગ્યાલઙ્કારપ્રતીતિરપિ તથૈવ । વસ્તુચારુત્વપ્રતીતયે સ્વશબ્દાનભિધેયત્વેન યત્પ્રતિપિપાદયિતુમિષ્યતે તદ્વ્યઙ્ગ્યમ્ । તચ્ચ ન સર્વં ગુણવૃત્તેર્વિષયઃ પ્રસિદ્ધ્યનુરોધાભ્યામપિ ગૌણાનાં શબ્દાનાં પ્રયોગદર્શનાત્ । તથોક્તં પ્રાક્ । યદપિ ચ ગુણવૃત્તેર્વિષયસ્તદપિ ચ વ્યઞ્જકત્વાનુપ્રવેશેન । તસ્માદ્ગુણવૃત્તેરપિ વ્યઞ્જકત્વસ્યાત્યન્તવિલક્ષણત્વમ્ । વાચકત્વગુણવૃત્તિવિલક્ષણસ્યાપિ ચ તસ્ય તદુભયાશ્રયત્વેન વ્યવસ્થાનમ્ ।

વ્યઞ્જકત્વં હિ ક્વચિદ્વાચકત્વાશ્રયેણ વ્યવતિષ્ઠતે, યથા વિવક્ષિતાન્યપરવાચ્યે ધ્વનૌ । ક્વચિત્તુ ગુણવૃત્ત્યાશ્રયેણ યથા અવિવક્ષિતવાચ્યે ધ્વનૌ । તદુભયાશ્રયત્વપ્રતિપાદનાયૈવ ચ ધ્વનેઃ પ્રથમતરં દ્વૌ પ્રભેદાવુપન્યસ્તૌ । તદુભયાશ્રિતત્વાચ્ચ તદેકરૂપત્વં તસ્ય ન શક્યતે વક્તુમ્ । યસ્માન્ન તદ્વાચકત્વૈકરૂપમેવ, ક્વચિલ્લક્ષણાશ્રયેણ વૃત્તેઃ । ન ચ લક્ષણૈકરૂપમેવાન્યત્ર વાચકત્વાશ્રયેણ વ્યવસ્થાનાત્ । ન ચોભયધર્મત્વેનૈવ તદેકૈકરૂપં ન ભવતિ । યાવદ્વાચકત્વલક્ષણાદિરૂપરહિતશબ્દધર્મત્વેનાપિ । તથાહિ ગીતધ્વનીનામપિ વ્યઞ્જકત્વમસ્તિ રસાદિવિષયમ્ । ન ચ તેષાં વાચકત્વં લક્ષણા વા કથઞ્ચિલ્લક્ષ્યતે । શબ્દાદન્યત્રાપિ વિષયે વ્યઞ્જકત્વસ્ય દર્શનાદ્વાચકત્વાદિશબ્દધર્મપ્રકારત્વમયુક્તં વક્તુમ્ । યદિ ચ વાચકત્વલક્ષણાદીનાં શબ્દપ્રકારાણાં પ્રસિદ્ધપ્રકારવિલક્ષણત્વેઽપિ વ્યઞ્જકત્વં પ્રકારત્વેન પરિકલ્પ્યતે તચ્છબ્દસ્યૈવ પ્રકારત્વેન કસ્માન્ન પરિકલ્પ્યતે । તદેવં શાબ્દે વ્યવહારે ત્રયઃ પ્રકારાઃ — વાચકત્વં ગુણવૃત્તિર્વ્યઞ્જકત્વં ચ । તત્ર વ્યઞ્જકત્વે યદા વ્યઙ્ગ્યપ્રાધાન્યં તદા ધ્વનિઃ, તસ્ય ચાવિવક્ષિતવાચ્યો વિવક્ષિતાન્યપરવાચ્યશ્ચેતિ દ્વૌ પ્રભેદાવનુક્રાન્તૌ પ્રથમતરં તૌ સવિસ્તરં નિર્ણીતૌ ।

અન્યો બ્રૂયાત્ — નનુ વિવક્ષિતાન્યપરવાચ્યે ધ્વનૌ ગુણવૃત્તિતા નાસ્તીતિ યદુચ્યતે તદ્યુક્તમ્ । યસ્માદ્વાચ્યવાચકપ્રતીતિપૂર્વિકા યત્રાર્થા-

ન્તરપ્રતિપત્તિસ્તત્ર કથં ગુણવૃત્તિવ્યવહારઃ, ન હિ ગુણવૃત્તૌ યદા નિમિત્તેન કેનચિદ્વિષયાન્તરે શબ્દ આરોપ્યતે અત્યન્તતિરસ્કૃતસ્વાર્થઃ યથા – “અગ્નિર્માણવકઃ”ઇત્યાદૌ, યદા વા સ્વાર્થમંશેનાપરિત્યજંસ્તત્સમ્બન્ધદ્વારેણ વિષયાન્તરમાક્રામતિ, યથા “ગઙ્ગાયાં ઘોષઃ”ઇત્યાદૌ । તદાવિવક્ષિતવાચ્યત્વમુપપદ્યતે । અત એવ ચ વિવક્ષિતાન્યપરવાચ્યે ધ્વનૌ વાચ્યવાચકયોર્દ્વયોરપિ સ્વરૂપપ્રતીતિરર્થાવગમનં ચ દૃશ્યત ઇતિ વ્યઞ્જકત્વવ્યવહારો યુક્ત્યનુરોધી । સ્વરૂપં પ્રકાશયન્નેવ પરાવભાસકો વ્યઞ્જક ઇત્યુચ્યતે, તથાવિધે વિષયે વાચકત્વસ્યૈવ વ્યઞ્જકત્વમિતિ ગુણવૃત્તિવ્યવહારો નિયમેનૈવ ન શક્યતે કર્તુમ્ ।

અવિવક્ષિતવાચ્યસ્તુ ધ્વનિર્ગુણવૃત્તેઃ કથં ભિદ્યતે । તસ્ય પ્રભેદદ્વયે ગુણવૃત્તિપ્રભેદદ્વયરૂપતા લક્ષ્યત એવ યતઃ । અયમપિ ન દોષઃ । યસ્માદવિવક્ષિતવાચ્યો ધ્વનિર્ગુણવૃત્તિમાર્ગાશ્રયોઽપિ ભવતિ ન તુ ગુણવૃત્તિરૂપ એવ । ગુણવૃત્તિર્હિ વ્યઞ્જકત્વશૂન્યાપિ દૃશ્યતે । વ્યઞ્જકત્વં ચ યથોક્તચારુત્વહેતું વ્યઙ્ગ્યં વિના ન વ્યવતિષ્ઠતે । ગુણવૃત્તિસ્તુ વાચ્યધર્માશ્રયેણૈવ વ્યઙ્ગ્યમાત્રાશ્રયેણ ચાભેદોપચારરૂપા સમ્ભવતિ, યથા — તીક્ષ્ણત્વાદગ્નિર્માણવકઃ, આહ્લાદકત્વાચ્ચન્દ્ર એવાસ્યા મુખમિત્યાદૌ । યથા ચ“પ્રિયે જને નાસ્તિ પુનરુક્તમ્”ઇત્યાદૌ । યાપિ લક્ષણરૂપગુણવૃત્તિઃ સાપ્યુપલક્ષણીયાર્થસમ્બન્ધમાત્રાશ્રયેણ ચારુરૂપવ્યઙ્ગ્યપ્રતીતિં વિનાપિ સમ્ભવત્યેવ, યથા — મઞ્ચાઃ ક્રોશન્તીત્યાદૌ વિષયે ।

યત્ર તુ સા ચારુરૂપવ્યઙ્ગ્યપ્રતીતિહેતુસ્તત્રાપિ વ્યઞ્જકત્વાનુપ્રવેશેનૈવ વાચકત્વવત્ । અસમ્ભવિના ચાર્થેન યત્ર વ્યવહારઃ, યથા — “સુવર્ણપુષ્પાં પૃથિવીમ્”ઇત્યાદૌ તત્ર ચારુરૂપવ્યઙ્ગ્યપ્રતીતિરેવ પ્રયોજિકેતિ તથાવિધેઽપિ વિષયે ગુણવૃત્તૌ સત્યામપિ ધ્વનિવ્યવહાર એવ યુક્ત્યનુરોધી । તસ્માદવિવક્ષિતવાચ્યે ધ્વનૌ દ્વયોરપિ પ્રભેદયોર્વ્યઞ્જકત્વવિશેષાવિશિષ્ટા ગુણવૃત્તિર્ન તુ તદેકરૂપા સહૃદયહૃદયાહ્લાદિની પ્રતીયમાના પ્રતીતિહેતુત્વાદ્વિષયાન્તરે તદ્રૂપશૂન્યાયા દર્શનાત્ । એતચ્ચ સર્વં પ્રાક્સૂચિતમપિ સ્ફુટતરપ્રતીતયે પુનરુક્તમ્ ।

અપિ ચ વ્યઞ્જકત્વલક્ષણો યઃ શબ્દાર્થયોર્ધર્મઃ સ પ્રસિદ્ધસમ્બન્ધાનુરોધીતિ ન કસ્યચિદ્વિમતિવિષયતામર્હતિ । શબ્દાર્થયોર્હિ પ્રસિદ્ધો યઃ સમ્બન્ધો વાચ્યવાચકભાવાખ્યસ્તમનુરુન્ધાન એવ વ્યઞ્જકત્વલક્ષણો

વ્યાપારઃ સામગ્ર્યન્તરસમ્બન્ધાદૌપાધિકઃ પ્રવર્તતે । અત એવ વાચક-
ત્વાત્તસ્ય વિશેષઃ । વાચકત્વં હિ શબ્દવિશેષસ્ય નિયત આત્મા વ્યુ-
ત્પત્તિકાલાદારભ્ય તદવિનાભાવેન તસ્ય પ્રસિદ્ધત્વાત્ । સ ત્વનિયતઃ,
ઔપાધિકત્વાત્ । પ્રકરણાદ્યવચ્છેદેન તસ્ય પ્રતીતેરિતરથા ત્વપ્રતીતેઃ ।
નનુ યદ્યનિયતસ્તત્કિં તસ્ય સ્વરૂપપરીક્ષયા । નૈષ દોષઃ ; યતઃ
શબ્દાત્મનિ તસ્યાનિયતત્વમ્, ન તુ સ્વે વિષયે વ્યઙ્ગ્યલક્ષણે । લિઙ્ગ-
ત્વન્યાયશ્ચાસ્ય વ્યઞ્જકભાવસ્ય લક્ષ્યતે, યથા લિઙ્ગત્વમાશ્રયેષ્વનિયતા-
વભાસમ્, ઇચ્છાધીનત્વાત્ ; સ્વવિષયાવ્યભિચારિ ચ । તથૈવેદં યથા
દર્શિતં વ્યઞ્જકત્વમ્ । શબ્દાત્મન્યનિયતત્વાદેવ ચ તસ્ય વાચકત્વપ્ર-
કારતા ન શક્યા કલ્પયિતુમ્ । યદિ હિ વાચકત્વપ્રકારતા તસ્ય
ભવેત્તચ્છબ્દાત્મનિ નિયતતાપિ સ્યાદ્વાચકત્વવત્ । સ ચ તથાવિધ
ઔપાધિકો ધર્મઃ શબ્દાનામૌત્પત્તિકશબ્દાર્થસમ્બન્ધવાદિના વાક્યતત્ત્વ-
વિદા પૌરુષાપૌરુષેયયોર્વાક્યયોર્વિશેષમભિદધતા નિયમેનાભ્યુપગન્તવ્યઃ,
તદનભ્યુપગમે હિ તસ્ય શબ્દાર્થસમ્બન્ધનિત્યત્વે સત્યપ્યપૌરુષેયપૌરુષે-
યયોર્વાક્યયોરર્થપ્રતિપાદને નિર્વિશેષત્વં સ્યાત્ । તદભ્યુપગમે તુ પૌરુ-
ષેયાણાં વાક્યાનાં પુરુષેચ્છાનુવિધાનસમારોપિતૌપાધિકવ્યાપારાન્તરાણાં
સત્યપિ સ્વાભિધેયસમ્બન્ધાપરિત્યાગે મિથ્યાર્થતાપિ ભવેત્ ।

દૃશ્યતે હિ ભાવાનામપરિત્યક્તસ્વસ્વભાવાનામપિ સામગ્ર્યન્તર-
સમ્પાતસમ્પાદિતૌપાધિકવ્યાપારાન્તરાણાં વિરુદ્ધક્રિયત્વમ્ । તથા હિ –
હિમમયૂખપ્રભૃતીનાં નિર્વાપિતસકલજીવલોકં શીતલત્વમુદ્વહતામેવ
પ્રિયાવિરહદહનદહ્યમાનમાનસૈર્જનૈરાલોક્યમાનાનાં સતાં સન્તાપકારિત્વં
પ્રસિદ્ધમેવ । તસ્માત્પૌરુષેયાણાં વાક્યાનાં સત્યપિ નૈસર્ગિકેઽર્થસમ્બન્ધે
મિથ્યાર્થત્વં સમર્થયિતુમિચ્છતા વાચકત્વવ્યતિરિક્તં કિંચિદ્રૂપમૌપાધિકં
વ્યક્તમેવાભિધાનીયમ્ । તચ્ચ વ્યઞ્જકત્વાદૃતે નાન્યત્ । વ્યઙ્ગ્યપ્રકાશનં
હિ વ્યઞ્જકત્વમ્ । પૌરુષેયાણિ ચ વાક્યાનિ પ્રાધાન્યેન પુરુષાભિપ્રાય-
મેવ પ્રકાશયન્તિ । સ ચ વ્યઙ્ગ્ય એવ ન ત્વભિધેયઃ, તેન સહાભિધાન-
સ્ય વાચ્યવાચકભાવલક્ષણસમ્બન્ધાભાવાત્ । નન્વનેન ન્યાયેન સર્વેષા-
મેવ લૌકિકાનાં વાક્યાનાં ધ્વનિવ્યવહારઃ પ્રસક્તઃ । સર્વેષામપ્યનેન
ન્યાયેન વ્યઞ્જકત્વાત્ । સત્યમેતત્; કિં તુ વક્ત્રભિપ્રાયપ્રકાશનેન
યદ્ વ્યઞ્જકત્વં તત્સર્વેષામેવ લૌકિકાનાં વાક્યાનામવિશિષ્ટમ્ । તત્તુ
વાચકત્વાન્ન ભિદ્યતે વ્યઙ્ગ્યમ્ હિ તત્ર નાન્તરીયકતયા વ્યવસ્થિતમ્ ।

ન તુ વિવક્ષિતત્વેન । યસ્ય તુ વિવક્ષિતત્વેન વ્યઙ્ગ્યસ્ય સ્થિતિઃ
તદ્વ્યઞ્જકત્વં ધ્વનિવ્યવહારસ્ય પ્રયોજકમ્ ।

યત્ત્વભિપ્રાયવિશેષરૂપં વ્યઙ્ગ્યં શબ્દાર્થાભ્યાં પ્રકાશતે તદ્ભવતિ
વિવક્ષિતં તાત્પર્યેણ પ્રકાશ્યમાનં સત્ । કિન્તુ તદેવ કેવલમપરિમિતવિ-
ષયસ્ય ધ્વનિવ્યવહારસ્ય ન પ્રયોજકમવ્યાપકત્વાત્ । તથા દર્શિતભેદ-
ત્રયરૂપં તાત્પર્યેણ દ્યોત્યમાનમભિપ્રાયરૂપમનભિપ્રાયરૂપં ચ સર્વમેવ
ધ્વનિવ્યવહારસ્ય પ્રયોજકમિતિ યથોક્તવ્યઞ્જકત્વવિશેષે ધ્વનિલક્ષણે
નાતિવ્યાપ્તિર્ન ચાવ્યાપ્તિઃ । તસ્માદ્વાક્યતત્ત્વવિદાં મતેન તાવદ્વ્યઞ્જક-
ત્વલક્ષણઃ શાબ્દો વ્યાપારો ન વિરોધી પ્રત્યુતાનુગુણ એવ લક્ષ્યતે ।
પરિનિશ્ચિતનિરપભ્રંશશબ્દબ્રહ્મણાં વિપશ્ચિતાં મતમાશ્રિત્યૈવ પ્રવૃત્તોઽયં
ધ્વનિવ્યવહાર ઇતિ તૈઃ સહ કિં વિરોધાવિરોધૌ ચિન્ત્યેતે । કૃત્રિમ-
શબ્દાર્થસમ્બન્ધવાદિનાં તુ યુક્તિવિદામનુભવસિદ્ધ એવાયં વ્યઞ્જકભાવઃ
શબ્દાનામર્થાન્તરાણામિવાવિરોધશ્ચેતિ ન પ્રતિક્ષેપ્યપદવીમવતરતિ ।

વાચકત્વે હિ તાર્કિકાણાં વિપ્રતિપત્તયઃ પ્રવર્તન્તામ્, કિમિદં સ્વા-
ભાવિકં શબ્દાનામાહોસ્વિત્સામયિકમિત્યાદ્યાઃ । વ્યઞ્જકત્વે તુ તત્પૃ-
ષ્ઠભાવિનિ ભાવાન્તરસાધારણે લોકપ્રસિદ્ધ એવાનુગમ્યમાને કો વિમ-
તીનામવસરઃ । અલૌકિકે હ્યર્થે તાર્કિકાણાં વિમતયો નિખિલાઃ પ્રવ-
ર્તન્તે ન તુ લૌકિકે । ન હિ નીલમધુરાદિષ્વશેષલોકેન્દ્રિયગોચરે
બાધારહિતે તત્ત્વે પરસ્પરં વિપ્રતિપન્ના દૃશ્યન્તે । ન હિ બાધારહિતં
નીલં નીલમિતિ બ્રુવન્નપરેણ પ્રતિષિધ્યતે નૈતન્નીલં પીતમેતદિતિ ।
તથૈવ વ્યઞ્જકત્વં વાચકાનાં શબ્દાનામવાચકાનાં ચ ગીતધ્વનીનામ-
શબ્દરૂપાણાં ચ ચેષ્ટાદીનાં યત્સર્વેષામનુભવસિદ્ધમેવ તત્કેનાપહ્નૂયતે ।
અશબ્દમર્થં રમણીયં હિ સૂચયન્તો વ્યાહારાસ્તથા વ્યાપારા નિબદ્ધા-
શ્ચાનિબદ્ધાશ્ચ વિદગ્ધપરિષત્સુ વિવિધા વિભાવ્યન્તે । તાનુપહાસ્યતા-
માત્મનઃ પરિહરન્ કોઽતિસન્દધીત સચેતાઃ । બ્રૂયાત્, અસ્ત્યતિસન્ધા-
નાવસરઃ વ્યઞ્જકત્વં શબ્દાનાં ગમકત્વં તચ્ચ લિઙ્ગત્વમતશ્ચ વ્યઙ્ગ્ય-
પ્રતીતિર્લિઙ્ગિપ્રતીતિરેવેતિ લિઙ્ગિલિઙ્ગભાવ એવ તેષાં વ્યઙ્ગ્યવ્યઞ્જકભાવો
નાપરઃ કશ્ચિત્ । અતશ્ચૈતદવશ્યમેવ બોદ્ધવ્યં યસ્માદ્વક્ત્રભિપ્રાયાપેક્ષયા
વ્યઞ્જકત્વમિદાનીમેવ ત્વયા પ્રતિપાદિતં વક્ત્રભિપ્રાયશ્ચાનુમેયરૂપ એવ ।

અત્રોચ્યતે — નન્વેવમપિ યદિ નામ સ્યાત્તત્કિં નશ્છિન્નમ્ । વાચ-
કત્વગુણવૃત્તિવ્યતિરિક્તો વ્યઞ્જકત્વલક્ષણઃ શબ્દવ્યાપારોઽસ્તીત્યસ્મા-

ભિરભ્યુપગતમ્ । તસ્ય ચૈવમપિ ન કાચિત્ ક્ષતિઃ । તદ્ધિ વ્યઞ્જકત્વં લિઙ્ગત્વમસ્તુ અન્યદ્વા । સર્વથા પ્રસિદ્ધશાબ્દપ્રકારવિલક્ષણત્વં શબ્દવ્યાપારવિષયત્વં ચ તસ્યાસ્તીતિ નાસ્ત્યેવાવયોર્વિવાદઃ । ન પુનરયં પરમાર્થો યદ્વ્યઞ્જકત્વં લિઙ્ગત્વમેવ સર્વત્ર વ્યઙ્ગ્યપ્રતીતિશ્ચ લિઙ્ગિપ્રતીતિરેવેતિ ।

યદપિ સ્વપક્ષસિદ્ધયેઽસ્મદુક્તમનૂદિતં ત્વયા વક્ત્રભિપ્રાયસ્ય વ્યઙ્ગ્યત્વેનાભ્યુપગમાત્તત્પ્રકાશને શબ્દાનાં લિઙ્ગત્વમેવેતિ તદેતદ્યથાસ્માભિરભિહિતં તદ્વિભજ્ય પ્રતિપાદ્યતે શ્રૂયતામ્ — દ્વિવિધો વિષયઃ શબ્દાનાં — અનુમેયઃ પ્રતિપાદ્યશ્ચ । તત્રાનુમેયો વિવક્ષાલક્ષણઃ । વિવક્ષા ચ શબ્દસ્વરૂપપ્રકાશનેચ્છા શબ્દેનાર્થપ્રકાશનેચ્છા ચેતિ દ્વિપ્રકારા । તત્રાદ્યા ન શાબ્દવ્યવહારાઙ્ગમ્ । સા હિ પ્રાણિત્વમાત્રપ્રતિપત્તિફલા । દ્વિતીયા તુ શબ્દવિશેષાવધારણાવસિતવ્યવહિતાપિ શબ્દકરણવ્યવહારનિબન્ધનમ્ । તે તુ દ્વે અપ્યનુમેયો વિષયઃ શબ્દાનામ્ । પ્રતિપાદ્યસ્તુ પ્રયોક્તુરર્થપ્રતિપાદનસમીહાવિષયીકૃતોઽર્થઃ ।

સ ચ દ્વિવિધઃ — વાચ્યો વ્યઙ્ગ્યશ્ચ । પ્રયોક્તા હિ કદાચિત્સ્વશબ્દેનાર્થં પ્રકાશયિતું સમીહતે કદાચિત્સ્વશબ્દાનભિધેયત્વેન પ્રયોજનાપેક્ષયા કયાચિત્ । સ તુ દ્વિવિધોઽપિ પ્રતિપાદ્યો વિષયઃ શબ્દાનાં ન લિઙ્ગિતયા સ્વરૂપેણ પ્રકાશતે, અપિ તુ કૃત્રિમેણાકૃત્રિમેણ વા સમ્બન્ધાન્તરેણ । વિવક્ષાવિષયત્વં હિ તસ્યાર્થસ્ય શબ્દૈર્લિઙ્ગિતયા પ્રતીયતે ન તુ સ્વરૂપમ્ । યદિ હિ લિઙ્ગિતયા તત્ર શબ્દાનાં વ્યાપારઃ સ્યાત્તચ્છબ્દાર્થે સમ્યઙ્મિથ્યાત્વાદિ વિવાદા એવ ન પ્રવર્તેરન્ ધૂમાદિલિઙ્ગાનુમિતાનુમેયાન્તરવત્ । વ્યઙ્ગ્યશ્ચાર્થો વાચ્યસામર્થ્યાક્ષિપ્તતયા વાચ્યવચ્છબ્દસ્ય સમ્બન્ધી ભવત્યેવ । સાક્ષાદસાક્ષાદ્ભાવો હિ સમ્બન્ધસ્યાપ્રયોજકઃ । વાચ્યવાચકભાવાશ્રયત્વં ચ વ્યઞ્જકત્વસ્ય પ્રાગેવ દર્શિતમ્ । તસ્માદ્વક્ત્રભિપ્રાયરૂપ એવ વ્યઙ્ગ્યે લિઙ્ગતયા શબ્દાનાં વ્યાપારઃ । તદ્વિષયીકૃતે તુ પ્રતિપાદ્યતયા । પ્રતીયમાને તસ્મિન્નભિપ્રાયરૂપેઽનભિપ્રાયરૂપે ચ વાચકત્વે નૈવ વ્યાપારઃ સમ્બન્ધાન્તરેણ વા । ન તાવદ્વાચકત્વેન યથોક્તં પ્રાક્ । સમ્બન્ધાન્તરેણ વ્યઞ્જકત્વમેવ । ન ચ વ્યઞ્જકત્વં લિઙ્ગત્વરૂપમેવ આલોકાદિષ્વન્યથા દૃષ્ટત્વાત્ । તસ્માત્પ્રતિપાદ્યો વિષયઃ શબ્દાનાં ન લિઙ્ગિત્વેન સમ્બન્ધી વાચ્યવત્ । યો હિ લિઙ્ગિત્વેન તેષાં સમ્બન્ધી યથા દર્શિતો વિષયઃ સ ન વાચ્યત્વેન પ્રતીયતે, અપિ તૂપાધિત્વેન ।

પ્રતિપાદ્યસ્ય ચ વિષયસ્ય લિઙ્ગિત્વે તદ્વિષયાણાં વિપ્રતિપત્તીનાં લૌકિકૈરેવ ક્રિયમાણાનામભાવઃ પ્રસજ્યેતેતિ । એતચ્ચોક્તમેવ ।

યથા ચ વાચ્યવિષયે પ્રમાણાન્તરાનુગમેન સમ્યક્ત્વપ્રતીતૌ ક્વચિત્ક્રિયમાણાયાં તસ્ય પ્રમાણાન્તરવિષયત્વે સત્યપિ ન શબ્દવ્યાપારવિષયતાહાનિસ્તદ્વ્યઙ્ગ્યસ્યાપિ । કાવ્યવિષયે ચ વ્યઙ્ગ્યપ્રતીતીનાં સત્યાસત્યનિરૂપણસ્યાપ્રયોજકત્વમેવેતિ તત્ર પ્રમાણાન્તરવ્યાપારપરીક્ષોપહાસાયૈવ સમ્પદ્યતે । તસ્માલ્લિઙ્ગિપ્રતીતિરેવ સર્વત્ર વ્યઙ્ગ્યપ્રતીતિરિતિ ન શક્યતે વક્તુમ્ ।

યત્ત્વનુમેયરૂપવ્યઙ્ગ્યવિષયં શબ્દાનાં વ્યઞ્જકત્વં તદ્ધ્વનિવ્યવહારસ્યાપ્રયોજકમ્ । અપિ તુ વ્યઞ્જકત્વલક્ષણઃ શબ્દાનાં વ્યાપાર ઔત્પત્તિકશબ્દાર્થસમ્બન્ધવાદિનાપ્યભ્યુપગન્તવ્ય ઇતિ પ્રદર્શનાર્થમુપન્યસ્તમ્ । તદ્ધિ વ્યઞ્જકત્વં કદાચિલ્લિઙ્ગત્વેન કદાચિદ્રૂપાન્તરેણ શબ્દાનાં વાચકાનામવાચકાનાં ચ સર્વવાદિભિરપ્રતિક્ષેપ્યમિત્યયમસ્માભિર્યત્ન આરબ્ધઃ । તદેવં ગુણવૃત્તિવાચકત્વાદિભ્યઃ શબ્દપ્રકારેભ્યો નિયમેનૈવ તાવદ્વિલક્ષણં વ્યઞ્જકત્વમ્ । તદન્તઃપાતિત્વેઽપિ તસ્ય હઠાદભિધીયમાને તદ્વિશેષસ્ય ધ્વનેર્યત્પ્રકાશનં વિપ્રતિપત્તિનિરાસાય સહૃદયવ્યુત્પત્તયે વા તત્ક્રિયમાણમનતિસન્ધેયમેવ । ન હિ સામાન્યમાત્રલક્ષણેનોપયોગિવિશેષલક્ષણાનાં પ્રતિક્ષેપઃ શક્યઃ કર્તુમ્ । એવં હિ સતિ સત્તામાત્રલક્ષણે કૃતે સકલસદ્વસ્તુલક્ષણાનાં પૌનરુક્ત્યપ્રસઙ્ગઃ । તદેવમ્ —

વિમતિવિષયો ય આસીન્મનીષિણાં સતતમવિદિતસતત્ત્વઃ ।
ધ્વનિસઞ્જ્ઞિતઃ પ્રકારઃ કાવ્યસ્ય વ્યઞ્જિતઃ સોઽયમ્ ॥

પ્રકારોઽન્યો ગુણીભૂતવ્યઙ્ગ્યઃ કાવ્યસ્ય દૃશ્યતે ।
યત્ર વ્યઙ્ગ્યાન્વયે વાચ્યચારુત્વં સ્યાત્પ્રકર્ષવત્ ॥ ૩૪॥

વ્યઙ્ગ્યોઽર્થો લલનાલાવણ્યપ્રખ્યો યઃ પ્રતિપાદિતસ્તસ્ય પ્રાધાન્યે ધ્વનિરિત્યુક્તમ્ । તસ્ય તુ ગુણીભાવેન વાચ્યચારુત્વપ્રકર્ષે ગુણીભૂતવ્યઙ્ગ્યો નામ કાવ્યપ્રભેદઃ પ્રકલ્પ્યતે । તત્ર વસ્તુમાત્રસ્ય વ્યઙ્ગ્યસ્ય તિરસ્કૃતવાચ્યેભ્યઃ પ્રતીયમાનસ્ય કદાચિદ્વાચ્યરૂપવાક્યાર્થાપેક્ષયા ગુણીભાવે સતિ ગુણીભૂતવ્યઙ્ગ્યતા ।

યથા —
લાવણ્યસિન્ધુરપરૈવ હિ કેયમત્ર

યત્રોત્પલાનિ શશિના સહ સમ્પ્લવન્તે ।
ઉન્મજ્જતિ દ્વિરદકુમ્ભતટી ચ યત્ર
યત્રાપરે કદલિકાણ્ડમૃણાલદણ્ડાઃ ॥

અતિરસ્કૃતવાચ્યેભ્યોઽપિ શબ્દેભ્યઃ પ્રતીયમાનસ્ય વ્યઙ્ગ્યસ્ય કદાચિદ્વાચ્યપ્રાધાન્યેન કાવ્યચારુત્વાપેક્ષયા ગુણીભાવે સતિ ગુણીભૂતવ્યઙ્ગ્યતા, યથોદાહૃતમ્ –“અનુરાગવતી સન્ધ્યા”ઇત્યેવમાદિ । તસ્યૈવ સ્વયમુક્ત્યા પ્રકાશીકૃતત્વેન ગુણીભાવઃ, યથોદાહૃતમ્ — “સઙ્કેતકાલમનસમ્”ઇત્યાદિ । રસાદિરૂપવ્યઙ્ગ્યસ્ય ગુણીભાવો રસવદલઙ્કારે દર્શિતઃ ; તત્ર ચ તેષામાધિકારિકવાક્યાપેક્ષયા ગુણીભાવો વિવહનપ્રવૃત્તભૃત્યાનુયાયિરાજવત્ । વ્યઙ્ગ્યાલઙ્કારસ્ય ગુણીભાવે દીપકાદિવિષયઃ ।

તથા —

પ્રસન્નગમ્ભીરપદાઃ કાવ્યબન્ધાઃ સુખાવહાઃ ।
યે ચ તેષુ પ્રકારોઽયમેવ યોજ્યાઃ સુમેધસા ॥ ૩૫॥

યે ચૈતેઽપરિમિતસ્વરૂપા અપિ પ્રકાશમાનાસ્તથાવિધાર્થરમણીયાઃ સન્તો વિવેકિનાં સુખાવહાઃ કાવ્યબન્ધાસ્તેષુ સર્વેષ્વેવાયં પ્રકારો ગુણીભૂતવ્યઙ્ગ્યો નામ યોજનીયઃ । યથા —

લક્ષ્મી દુહિતા જામાતા હરિઃ તથા ગૃહિણી ગઙ્ગા ।
અમૃતમૃગાઙ્કૌ ચ સુતૌ અહો કુટુમ્બં મહોદધેઃ ॥

વાચ્યાલઙ્કારવર્ગોઽયં વ્યઙ્ગ્યાંશાનુગમે સતિ ।
પ્રાયેણૈવ પરાં છાયાં બિભ્રલ્લક્ષ્યે નિરીક્ષ્યતે ॥ ૩૬॥

વાચ્યાલઙ્કારવર્ગોઽયં વ્યઙ્ગ્યાંશસ્યાલઙ્કારસ્ય વસ્તુમાત્રસ્ય વા યથાયોગમનુગમે સતિ ચ્છાયાતિશયં બિભ્રલ્લક્ષણકારૈરેકદેશેન દર્શિતઃ । સ તુ તથારૂપઃ પ્રાયેણ સર્વ એવ પરીક્ષ્યમાણો લક્ષ્યે નિરીક્ષ્યતે । તથા હિ – દીપકસમાસોક્ત્યાદિવદન્યેઽપ્યલઙ્કારાઃ પ્રાયેણ વ્યઙ્ગ્યાલઙ્કારાન્તરવસ્ત્વન્તરસંસ્પર્શિનો દૃશ્યન્તે । યતઃ પ્રથમં તાવદતિશયોક્તિગર્ભતા સર્વાલઙ્કારેષુ શક્યક્રિયા । કૃતૈવ ચ સા મહાકવિભિઃ કામપિ કાવ્યચ્છવિં પુષ્યતિ, કથં હ્યતિશયયોગિતા સ્વવિષયૌચિત્યેન ક્રિયમાણા સતી કાવ્યે નોત્કર્ષમાવહેત્ । ભામહેનાપ્યતિશયોક્તિલક્ષણે યદુક્તમ્ —
સૈષા સર્વૈવ વક્રોક્તિરનયાર્થો વિભાવ્યતે ।

યત્નોઽસ્યાં કવિના કાર્યઃ કોઽલઙ્કારોઽનયા વિના ॥ ઇતિ ।

તત્રાતિશયોક્તિર્યમલઙ્કારમધિતિષ્ઠતિ કવિપ્રતિભાવશાત્તસ્ય ચારુત્વાતિશયયોગોઽન્યસ્ય ત્વલઙ્કારમાત્રતૈવેતિ સર્વાલઙ્કારશરીરસ્વીકરણયોગ્યત્વેનાભેદોપચારાત્સૈવ સર્વાલઙ્કારરૂપેત્યયમેવાર્થોઽવગન્તવ્યઃ । તસ્યાશ્ચાલઙ્કારાન્તરસંકીર્ણત્વં કદાચિદ્વાચ્યત્વેન કદચિદ્વ્યઙ્ગ્યત્વેન । વ્યઙ્ગ્યત્વમપિ કદાચિત્પ્રાધાન્યેન કદાચિદ્ગુણભાવેન । તત્રાદ્યે પક્ષે વાચ્યાલઙ્કારમાર્ગઃ । દ્વિતીયે તુ ધ્વનાવન્તર્ભાવઃ । તૃતીયે તુ ગુણીભૂતવ્યઙ્ગ્યરૂપતા ।

અયં ચ પ્રકારોઽન્યેષામપ્યલઙ્કારાણામસ્તિ, તેષાં તુ ન સર્વવિષયઃ । અતિશયોક્તેસ્તુ સર્વાલઙ્કારવિષયોઽપિ સમ્ભવતીત્યયં વિશેષઃ । યેષુ ચાલઙ્કારેષુ સાદૃશ્યમુખેન તત્ત્વપ્રતિલમ્ભઃ યથા રૂપકોપમાતુલ્યયોગિતાનિદર્શનાદિષુ તેષુ ગમ્યમાનધર્મમુખેનૈવ યત્સાદૃશ્યં તદેવ શોભાતિશયશાલિ ભવતીતિ તે સર્વેઽપિ ચારુત્વાતિશયયોગિનઃ સન્તો ગુણીભૂતવ્યઙ્ગ્યસ્યૈવ વિષયાઃ । સમાસોક્ત્યાક્ષેપપર્યાયોક્તાદિષુ તુ ગમ્યમાનાંશાવિનાભાવેનૈવ તત્ત્વવ્યવસ્થાનાદ્ગુણીભૂતવ્યઙ્ગ્યતા નિર્વિવાદૈવ । તત્ર ચ ગુણીભૂતવ્યઙ્ગ્યતાયામલઙ્કારાણાં કેષાઞ્ચિદલઙ્કારવિશેષગર્ભતાયાં નિયમઃ । યથા વ્યાજસ્તુતેઃ પ્રેયોઽલઙ્કારગર્ભત્વે । કેષાઞ્ચિદલઙ્કારમાત્રગર્ભતાયાં નિયમઃ । યથા સન્દેહાદીનામુપમાગર્ભત્વે । કેષાઞ્ચિદલઙ્કારાણાં પરસ્પરગર્ભતાપિ સમ્ભવતિ । યથા દીપકોપમયોઃ । તત્ર દીપકમુપમાગર્ભત્વેન પ્રસિદ્ધમ્ । ઉપમાપિ કદાચિદ્દીપકચ્છાયાનુયાયિની । યથા માલોપમા । તથા હિ“પ્રભામહત્યા શિખયેવ દીપઃ”ઇત્યાદૌ સ્ફુટૈવ દીપકચ્છાયા લક્ષ્યતે ।

તદેવં વ્યઙ્ગ્યાંશસંસ્પર્શે સતિ ચારુત્વાતિશયયોગિનો રૂપકાદયોઽલઙ્કારાઃ સર્વ એવ ગુણીભૂતવ્યઙ્ગ્યસ્ય માર્ગઃ । ગુણીભૂતવ્યઙ્ગ્યત્વં ચ તેષાં તથાજાતીયાનાં સર્વેષામેવોક્તાનુક્તાનાં સામાન્યમ્ । તલ્લક્ષણે સર્વ એવૈતે સુલક્ષિતા ભવન્તિ । એકૈકસ્ય સ્વરૂપવિશેષકથનેન તુ સામાન્યલક્ષણરહિતેન પ્રતિપાદપાઠેનેવ શબ્દા ન શક્યન્તે તત્ત્વતો નિર્જ્ઞાતુમ્, આનન્ત્યાત્ । અનન્તા હિ વાગ્વિકલ્પાસ્તત્પ્રકારા એવ ચાલઙ્કારાઃ । ગુણીભૂતવ્યઙ્ગ્યસ્ય ચ પ્રકારાન્તરેણાપિ વ્યઙ્ગ્યાર્થાનુગમલક્ષણેન વિષયત્વમસ્ત્યેવ । તદયં ધ્વનિનિષ્યન્દરૂપો દ્વિતીયોઽપિ મહાકવિવિષયોઽતિરમણીયો લક્ષણીયઃ સહૃદયૈઃ । સર્વથા નાસ્ત્યેવ સહૃદયહૃદયહા-

રિણઃ કાવ્યસ્ય સ પ્રકારો યત્ર ન પ્રતીયમાનાર્થસંસ્પર્શેન સૌભાગ્યમ્ ।
તદિદં કાવ્યરહસ્યં પરમિતિ સૂરિભિર્ભાવનીયમ્ ।

મુખ્યા મહાકવિગિરામલઙ્કૃતિભૃતામપિ ।
પ્રતીયમાનચ્છાયૈષા ભૂષા લજ્જેવ યોષિતામ્ ॥ ૩૭॥

અનયા સુપ્રસિદ્ધોઽપ્યર્થઃ કિમપિ કામનીયકમાનીયતે ।
તદ્યથા —
વિશ્રમ્ભોત્થા મન્મથાજ્ઞાવિધાને યે મુગ્ધાક્ષ્યાઃ કેઽપિ લીલાવિશેષાઃ ।
અક્ષુણ્ણાસ્તે ચેતસા કેવલેન સ્થિત્વૈકાન્તે સન્તતં ભાવનીયાઃ ॥

ઇત્યત્ર કેઽપીત્યનેન પદેન વાચ્યમસ્પષ્ટમભિદધતા પ્રતીયમાનં
વસ્ત્વક્લિષ્ટમનન્તમર્પયતા કા છાયા નોપપાદિતા ।
અર્થાન્તરગતિઃ કાક્વા યા ચૈષા પરિદૃશ્યતે ।
સા વ્યઙ્ગ્યસ્ય ગુણીભાવે પ્રકારમિમમાશ્રિતા ॥ ૩૮॥

યા ચૈષા કાક્વા ક્વચિદર્થાન્તરપ્રતીતિર્દૃશ્યતે સ વ્યઙ્ગ્યસ્યાર્થસ્ય
ગુણીભાવે સતિ ગુણીભૂતવ્યઙ્ગ્યલક્ષણં કાવ્યપ્રભેદમાશ્રયતે । યથા —
“સ્વસ્થા ભવન્તિ મયિ જીવતિ ધાર્તરાષ્ટ્રાઃ”।
યથા વા —
આમ્ અસત્યઃ ઉપરમ પતિવ્રતે ન ત્વયા મલિનિતં શીલમ્ ।
કિં પુનર્જનસ્ય જાયેવ નાપિતં તં ન કામયામહે ॥

શબ્દશક્તિરેવ હિ સ્વાભિધેયસામર્થ્યાક્ષિપ્તકાકુસહાયા સત્યર્થ-
વિશેષપ્રતિપત્તિહેતુર્ન કાકુમાત્રમ્ । વિષયાન્તરે સ્વેચ્છાકૃતાત્કાકુમાત્રા-
ત્તથાવિધાર્થપ્રતિપત્ત્યસમ્ભવાત્ । સ ચાર્થઃ કાકુવિશેષસહાયશબ્દવ્યાપા-
રોપારૂઢોઽપ્યર્થસામર્થ્યલભ્ય ઇતિ વ્યઙ્ગ્યરૂપ એવ । વાચકત્વાનુગમેનૈવ
તુ યદા તદ્વિશિષ્ટવાચ્યપ્રતીતિસ્તદા ગુણીભૂતવ્યઙ્ગ્યતયા તથાવિધાર્થ-
દ્યોતિનઃ કાવ્યસ્ય વ્યપદેશઃ । વ્યઙ્ગ્યવિશિષ્ટવાચ્યાભિધાયિનો હિ
ગુણીભૂતવ્યઙ્ગ્યત્વમ્ ।
પ્રભેદસ્યાસ્ય વિષયો યશ્ચ યુક્ત્યા પ્રતીયતે ।
વિધાતવ્યા સહૃદયૈર્ન તત્ર ધ્વનિયોજના ॥ ૩૮॥

સઙ્કીર્ણો હિ કશ્ચિદ્ધ્વનેર્ગુણીભૂતવ્યઙ્ગ્યસ્ય ચ લક્ષ્યે દૃશ્યતે
માર્ગઃ । તત્ર યસ્ય યુક્તિસહાયતા તત્ર તેન વ્યપદેશઃ કર્તવ્યઃ । ન
સર્વત્ર ધ્વનિરાગિણા ભવિતવ્યમ્ । યથા

પત્યુઃ શિરશ્ચન્દ્રકલામનેન સ્પૃશેતિ સખ્યા પરિહાસપૂર્વમ્ ।
સા રઞ્જયિત્વા ચરણૌ કૃતાશીર્માલ્યેન તાં નિર્વચનં જઘાન ॥

યથા ચ —
પ્રયચ્છતોચ્ચૈઃ કુસુમાનિ માનિની વિપક્ષગોત્રં દયિતેન લમ્ભિતા ।
ન કિઞ્ચિદૂચે ચરણેન કેવલં લિલેખ બાષ્પાકુલલોચના ભુવમ્ ॥

ઇત્યત્ર“નિર્વચનં જઘાન”“ન કિઞ્ચિદૂચે”ઇતિ પ્રતિષેધમુખેન વ્ય-ઙ્ગ્યસ્યાર્થસ્યોક્ત્યા કિઞ્ચિદ્વિષયીકૃતત્વાદ્ ગુણીભાવ એવ શોભતે । યદા વક્રોક્તિં વિના વ્યઙ્ગ્યોઽર્થસ્તાત્પર્યેણ પ્રતીયતે તદા તસ્ય પ્રાધાન્યમ્ । યથા“એવં વાદિનિ દેવર્ષૌ”ઇત્યાદૌ । ઇહ પુનરુક્તિર્ભઙ્ગ્યાસ્તીતિ વાચ્ય-સ્યાપિ પ્રાધાન્યમ્ । તસ્માન્નાત્રાનુરણનરૂપવ્યઙ્ગ્યધ્વનિવ્યપદેશો વિધેયઃ ।

પ્રકારોઽયં ગુણીભૂતવ્યઙ્ગ્યોઽપિ ધ્વનિરૂપતામ્ ।
ધત્તે રસાદિતાત્પર્યપર્યાલોચનયા પુનઃ ॥ ૪૦ ॥

ગુણીભૂતવ્યઙ્ગ્યોઽપિ કાવ્યપ્રકારો રસભાવાદિતાત્પર્યાલોચને પુનર્ધ્વનિરેવ સમ્પદ્યતે । યથાત્રૈવાનન્તરોદાહૃતે શ્લોકદ્વયે । યથા ચ —
દુરારાધા રાધા સુભગ યદનેનાપિ મૃજત-
સ્તવૈતત્પ્રાણેશાજઘનવસનેનાશ્રુ પતિતમ્ ।
કઠોરં સ્ત્રીચેતસ્તદલમુપચારૈર્વિરમ હે
ક્રિયાત્કલ્યાણં વો હરિરનુનયેષ્વેવમુદિતઃ ॥

એવં સ્થિતે ચ“ન્યક્કારો હ્યયમેવ”ઇત્યાદિશ્લોકનિર્દિષ્ટાનાં પદાનાં વ્યઙ્ગ્યવિશિષ્ટવાચ્યપ્રતિપાદનેઽપ્યેતદ્વાક્યાર્થીભૂતરસાપેક્ષયા વ્યઞ્જકત્વમુક્તમ્ । ને તેષાં પદાનામર્થાન્તરસંક્રમિતવાચ્યધ્વનિભ્રમો વિધાતવ્યઃ, વિવક્ષિતવાચ્યત્વાત્તેષામ્ । તેષુ હિ વ્યઙ્ગ્યવિશિષ્ટત્વં વાચ્યસ્ય પ્રતીયતે ન તુ વ્યઙ્ગ્યરૂપપરિણતત્વમ્ । તસ્માદ્વાક્યં તત્ર ધ્વનિઃ, પદાનિ તુ ગુણીભૂતવ્યઙ્ગ્યાનિ । ન ચ કેવલં ગુણીભૂતવ્યઙ્ગ્યા-ન્યેવ પદાન્યલક્ષ્યક્રમવ્યઙ્ગ્યધ્વનેર્વ્યઞ્જકાનિ યાવદર્થાન્તરસંક્રમિત-વાચ્યાનિ ધ્વનિપ્રભેદરૂપાણ્યપિ । યથાત્રૈવ શ્લોકે રાવણ ઇત્યસ્ય પ્રભેદા-ન્તરરૂપવ્યઞ્જકત્વમ્ । યત્ર તુ વાક્યે રસાદિતાત્પર્યં નાસ્તિ ગુણીભૂત-વ્યઙ્ગ્યૈઃ પદૈરુદ્ભાસિતેઽપિ તત્ર ગુણીભૂતવ્યઙ્ગ્યતૈવ સમુદાયધર્મઃ ।
યથા —
રાજાનમપિ સેવન્તે વિષમમપ્યુપયુઞ્જતે ।

રમન્તે ચ સહ સ્ત્રીભિઃ કુશલાઃ ખલુ માનવાઃ ॥

ઇત્યાદૌ । વાચ્યવ્યઙ્ગ્યયોઃ પ્રાધાન્યાપ્રાધાન્યવિવેકે પરઃ પ્રયત્નો વિધાતવ્યઃ, યેન ધ્વનિગુણીભૂતવ્યઙ્ગ્યયોરલઙ્કારાણાં ચાસઙ્કીર્ણો વિષયઃ સુજ્ઞાતો ભવતિ । અન્યથા તુ પ્રસિદ્ધાલઙ્કારવિષય એવ વ્યામોહઃ પ્રવર્તતે । યથા —
લાવણ્યદ્રવિણવ્યયો ન ગણિતઃ ક્લેશો મહાન્ સ્વીકૃતઃ
સ્વચ્છન્દસ્ય સુખં જનસ્ય વસતશ્ચિન્તાનલો દીપિતઃ ।
એષાપિ સ્વયમેવ તુલ્યરમણાભાવાદ્વરાકી હતા
કોઽર્થશ્ચેતસિ વેધસા વિનિહિતસ્તન્વ્યાસ્તનું તન્વતા ॥

ઇત્યત્ર વ્યાજસ્તુતિરલઙ્કાર ઇતિ વ્યાખ્યાયિ કેનચિત્તન્ન ચતુરસ્રમ્, યતોઽસ્યાભિધેયસ્યૈતદલઙ્કારસ્વરૂપમાત્રપર્યવસાયિત્વે ન સુશ્લિષ્ટા । યતો ન તાવદયં રાગિણઃ કસ્યચિદ્વિકલ્પઃ । તસ્ય "એષાપિ સ્વયમેવ તુલ્યરમણાભાવાદ્વરાકી હતા"ઇત્યેવંવિધોક્ત્યનુપપત્તેઃ । નાપિ નીરાગસ્ય; તસ્યૈવંવિધવિકલ્પપરિહારૈકવ્યાપારત્વાત્ । ન ચાયં શ્લોકઃ ક્વચિત્પ્રબન્ધ ઇતિ શ્રૂયતે, યેન તત્પ્રકરણાનુગતાર્થતાસ્ય પરિકલ્પ્યતે । તસ્માદપ્રસ્તુતપ્રશંસેયમ્ । યસ્માદનેન વાચ્યેન ગુણીભૂતાત્મના નિસ્સામાન્યગુણાવલોપાધ્માતસ્ય નિજમહિમોત્કર્ષજનિતસમત્સરજનજ્વરસ્ય વિશેષજ્ઞમાત્મનો ન કઞ્ચિદેવાપરં પશ્યતઃ પરિદેવિતમેતદિતિ પ્રકાશ્યતે । તથા ચાયં ધર્મકીર્તેઃ શ્લોક ઇતિ પ્રસિદ્ધિઃ । સમ્ભાવ્યતે ચ તસ્યૈવ । યસ્માત્ —
અનધ્યવસિતાવગાહનમનલ્પધીશક્તિના-
પ્યદૃષ્ટપરમાર્થતત્ત્વમધિકાભિયોગૈરપિ ।
મતં મમ જગત્યલબ્ધસદૃશપ્રતિગ્રાહકં
પ્રયાસ્યતિ પયોનિધેઃ પય ઇવ સ્વદેહે જરામ્ ॥

ઇત્યનેનાપિ શ્લોકેનૈવંવિધોઽભિપ્રાયઃ પ્રકાશિત એવ । અપ્રસ્તુતપ્રશંસાયાં ચ યદ્વાચ્યં તસ્ય કદાચિદ્વિવક્ષિતત્વં, કદાચિદવિવક્ષિતત્વં, કદાચિદ્વિવક્ષિતાવિવક્ષિતત્વમિતિ ત્રયી બન્ધચ્છાયા । તત્ર વિવક્ષિતત્વં યથા —

પરાર્થે યઃ પીડામનુભવતિ ભઙ્ગેઽપિ મધુરો
યદીયઃ સર્વેષામિહ ખલુ વિકારોઽપ્યભિમતઃ ।

ન સમ્પ્રાપ્તો વૃદ્ધિં યદિ સ ભૃશમક્ષેત્રપતિતઃ
કિમિક્ષોર્દોષોઽસૌ ન પુનરગુણાયા મરુભુવઃ ॥

યથા વા મમૈવ —
અમી યે દૃશ્યન્તે નનુ સુભગરૂપાઃ સફલતા
ભવત્યેષાં યસ્ય ક્ષણમુપગતાનાં વિષયતામ્ ।
નિરાલોકે લોકે કથમિદમહો ચક્ષુરધુના
સમં જાતં સર્વૈર્ન સમમથવાન્યૈરવયવૈઃ ॥

અનયોર્હિ દ્વયોઃ શ્લોકયોરિક્ષુચક્ષુષી વિવક્ષિતસ્વરૂપે એવ ન ચ
પ્રસ્તુતે । મહાગુણસ્યાવિષયપતિતત્વાદપ્રાપ્તપરભાગસ્ય કસ્યચિત્સ્વરૂપ-
મુપવર્ણયિતું દ્વયોરપિ શ્લોકયોસ્તાત્પર્યેણ પ્રસ્તુતત્વાત્ । અવિવક્ષિત-
ત્વં યથા —
કસ્ત્વં ભોઃ કથયામિ દૈવહતકં માં વિદ્ધિ શાખોટકં
વૈરાગ્યાદિવ વક્ષિ, સાધુ વિદિતં કસ્માદિદં કથ્યતે ।
વામેનાત્ર વટસ્તમધ્વગજનઃ સર્વાત્મના સેવતે
ન ચ્છાયાપિ પરોપકારકરિણી માર્ગસ્થિતસ્યાપિ મે ॥

ન હિ વૃક્ષવિશેષેણ સહોક્તિપ્રત્યુક્તી સમ્ભવત ઇત્યવિવક્ષિતાભિધે-
યેનૈવાનેન શ્લોકેન સમૃદ્ધાસત્પુરુષસમીપવર્તિનો નિર્ધનસ્ય કસ્યચિ-
ન્મનસ્વિનઃ પરિદેવિતં તાત્પર્યેણ વાક્યાર્થીકૃતમિતિ પ્રતીયતે ।
વિવક્ષિતત્વાવિવક્ષિતત્વં યથા —
ઉત્પથજાતાયા અશોભનાયા ફલકુસુમપત્રરહિતાયાઃ ।
બદર્યા વૃત્તિં દદત્પામારઃ ભોઃ હસિષ્યસે ॥

અત્ર હિ વાચ્યાર્થો નાત્યન્તં સમ્ભવી ન ચાસમ્ભવી । તસ્માદ્વા-
ચ્યવ્યઙ્ગ્યયોઃ પ્રાધાન્યાપ્રાધાન્યે યત્નતો નિરૂપણીયે ।

પ્રધાનગુણભાવાભ્યાં વ્યઙ્ગ્યસ્યૈવં વ્યવસ્થિતે ।
કાવ્યે ઉભે તતોઽન્યદ્યત્તચ્ચિત્રમભિધીયતે ॥ ૪૧
ચિત્રં શબ્દાર્થભેદેન દ્વિવિધં ચ વ્યવસ્થિતમ્ ।
તત્ર કિઞ્ચિચ્છબ્દચિત્રં વાચ્યચિત્રમતઃ પરમ્ ॥ ૪૨॥

વ્યઙ્ગ્યસ્યાર્થસ્ય પ્રાધાન્યે ધ્વનિસંજ્ઞિતકાવ્યપ્રકારઃ ગુણભાવે તુ
ગુણીભૂતવ્યઙ્ગ્યતા । તતોઽન્યદ્રસભાવાદિતાત્પર્યરહિતં વ્યઙ્ગ્યાર્થવિશે-
ષપ્રકાશનશક્તિશૂન્યં ચ કાવ્યં કેવલવાચ્યવાચકવૈચિત્ર્યમાત્રાશ્રયેણો-

પનિબદ્ધમાલેખ્યપ્રખ્યં યદાભાસતે તચ્ચિત્રમ્ । ન તન્મુખ્યં કાવ્યમ્ ।
કાવ્યાનુકારો હ્યસૌ । તત્ર કિઞ્ચિચ્છબ્દચિત્રં યથા દુષ્કરયમકાદિ ।
વાચ્યચિત્રં તતઃ શબ્દચિત્રાદન્યદ્વ્યઙ્ગ્યાર્થસંસ્પર્શરહિતં પ્રાધાન્યેન
વાક્યાર્થતયા સ્થિતં રસાદિતાત્પર્યરહિતમુત્પ્રેક્ષાદિ ।
અથ કિમિદં ચિત્રં નામ ? યત્ર ન પ્રતીયમાનાર્થસંસ્પર્શઃ । પ્રતી-
યમાનો હ્યર્થસ્ત્રિભેદઃ પ્રાક્પ્રદર્શિતઃ । તત્ર યત્ર વસ્ત્વલઙ્કારાન્તરં વા
વ્યઙ્ગ્યં નાસ્તિ સ નામ ચિત્રસ્ય કલ્પ્યતાં વિષયઃ । યત્ર તુ રસાદીના-
મવિષયત્વં સ કાવ્યપ્રકારો ન સમ્ભવત્યેવ । યસ્માદવસ્તુસંસ્પર્શિતા
કાવ્યસ્ય નોપપદ્યતે । વસ્તુ ચ સર્વમેવ જગદ્ગતમવશ્યં કસ્યચિદ્ર-
સસ્ય ભાવસ્ય વાઙ્ગત્વં પ્રતિપદ્યતે અન્તતો વિભાવત્વેન । ચિત્તવૃત્તિવિ-
શેષા હિ રસાદયઃ, ન ચ તદસ્તિ વસ્તુ કિઞ્ચિદ્યન્ન ચિત્તવૃત્તિવિશેષ-
મુપજનયતિ તદનુત્પાદને વા કવિવિષયતૈવ તસ્ય ન સ્યાત્ કવિવિષ-
યશ્ચ ચિત્રતયા કશ્ચિન્નિરૂપ્યતે ।
અત્રોચ્યતે — સત્યં ન તાદૃક્કાવ્યપ્રકારોઽસ્તિ યત્ર રસાદીનામ-
પ્રતીતિઃ । કિં તુ યદા રસભાવાદિવિવક્ષાશૂન્યઃ કવિઃ શબ્દાલઙ્કાર-
મર્થાલઙ્કારં વોપનિબધ્નાતિ તદા તદ્વિવક્ષાપેક્ષયા રસાદિશૂન્યતાર્થસ્ય
પરિકલ્પ્યતે । વિવક્ષોપારૂઢ એવ હિ કાવ્યે શબ્દાનામર્થઃ । વાચ્યસામ-
ર્થ્યવશેન વા કવિવિવક્ષાવિરહેઽપિ તથાવિધે વિષયે રસાદિપ્રતીતિર્ભવન્તી
પરિદુર્બલા ભવતીત્યનેનાપિ પ્રકારેણ નીરસત્વં પરિકલ્પ્ય ચિત્રવિષયો
વ્યવસ્થાપ્યતે । તદિદમુક્તમ્ —
“રસભાવાદિવિષયવિવક્ષાવિરહે સતિ ।
અલઙ્કારનિબન્ધો યઃ સ ચિત્રવિષયો મતઃ ॥

રસાદિષુ વિવક્ષા તુ સ્યાત્તાત્પર્યવતી યદા ।
તદા નાસ્ત્યેવ તત્કાવ્યં ધ્વનેર્યત્ર ન ગોચરઃ ॥”
એતચ્ચ ચિત્રં કવીનાં વિશૃઙ્ખલગિરાં રસાદિતાત્પર્યમનપેક્ષ્યૈવ કાવ્ય-
પ્રવૃત્તિદર્શનાદસ્માભિઃ પરિકલ્પિતમ્ । ઇદાનીન્તનાનાં તુ ન્યાય્યે
કાવ્યનયવ્યવસ્થાપને ક્રિયમાણે નાસ્ત્યેવ ધ્વનિવ્યતિરિક્તઃ કાવ્ય-
પ્રકારઃ । યતઃ પરિપાકવતાં કવીનાં રસાદિતાત્પર્યવિરહે વ્યાપાર
એવ ન શોભતે । રસાદિતાત્પર્યે ચ નાસ્ત્યેવ તદ્વસ્તુ યદભિમતરસાઙ્ગતાં
નીયમાનં ન પ્રગુણીભવતિ । અચેતના પિ હિ ભાવા યથાયથમુચિત-
રસવિભાવતયા ચેતનવૃત્તાન્તયોજનયા વા ન સન્ત્યેવ તે યે યાન્તિ ન

રસાઙ્ગતામ્ । તથા ચેદમુચ્યતે —
અપારે કાવ્યસંસારે કવિરેકઃ પ્રજાપતિઃ ।
યથાસ્મૈ રોચતે વિશ્વં તથેદં પરિવર્તતે ॥

શૃઙ્ગારી ચેત્કવિઃ કાવ્યે જાતં રસમયં જગત્ ।
સ એવ વીતરાગશ્ચેન્નીરસં સર્વમેવ તત્ ॥

ભાવાનચેતનાનપિ ચેતનવચ્ચેતનાનચેતનવત્ ।
વ્યવહારયતિ યથેષ્ટં સુકવિઃ કાવ્યે સ્વતન્ત્રતયા ॥

તસ્માન્નાસ્ત્યેવ તદ્વસ્તુ યત્સર્વાત્મના રસતાત્પર્યવતઃ કવેસ્તદિચ્છયા તદભિમતરસાઙ્ગતાં ન ધત્તે । તથોપનિબધ્યમાનં વા ન ચારુત્વાતિશયં પુષ્ણાતિ । સર્વમેતચ્ચ મહાકવીનાં કાવ્યેષુ દૃશ્યતે । અસ્માભિરપિ સ્વેષુ કાવ્યપ્રબન્ધેષુ યથાયથં દર્શિતમેવ । સ્થિતે ચૈવં સર્વ એવ કાવ્યપ્રકારો ન ધ્વનિધર્મતામતિપતતિ રસાદ્યપેક્ષાયાં કવેર્ગુણીભૂતવ્યઙ્ગ્યલક્ષણોઽપિ પ્રકારસ્તદઙ્ગતામવલમ્બત ઇત્યુક્તં પ્રાક્ । યદા તુ ચાટુષુ દેવતાસ્તુતિષુ વા રસાદીનામઙ્ગતયા વ્યવસ્થાનં હૃદયવતીષુ ચ સુપ્રજ્ઞકગાથાસુ કાસુચિદ્વ્યઙ્ગ્યવિશિષ્ટવાચ્યે પ્રાધાન્યં તદપિ ગુણીભૂતવ્યઙ્ગ્યસ્ય ધ્વનિનિષ્પન્દભૂતત્વમેવેત્યુક્તં પ્રાક્ । તદેવમિદાનીન્તનકવિકાવ્યનયોપદેશે ક્રિયમાણે પ્રાથમિકાનામભ્યાસાર્થિનાં યદિ પરં ચિત્રેણ વ્યવહારઃ, પ્રાપ્તપરિણતીનાં તુ ધ્વનિરેવ કાવ્યમિતિ સ્થિતમેતત્ ।
તદયમત્ર સંગ્રહઃ —
યસ્મિન્ રસો વા ભાવો વા તાત્પર્યેણ પ્રકાશતે ।
સંવૃત્ત્યાભિહિતૌ વસ્તુ યત્રાલઙ્કાર એવ વા ॥

કાવ્યાધ્વનિ ધ્વનિર્વ્યઙ્ગ્યપ્રાધાન્યૈકનિબન્ધનઃ ।
સર્વત્ર તત્ર વિષયી જ્ઞેયઃ સહૃદયૈર્જનૈઃ ॥

સગુણીભૂતવ્યઙ્ગ્યૈઃ સાલઙ્કારૈઃ સહ પ્રભેદૈઃ સ્વૈઃ ।
સઙ્કરસંસૃષ્ટિભ્યાં પુનરપ્યુદ્યોતતે બહુધા ॥ ૪૩ ॥

તસ્ય ચ ધ્વનેઃ સ્વપ્રભેદૈર્ગુણીભૂતવ્યઙ્ગ્યેન વાચ્યાલઙ્કારૈશ્ચ સઙ્કરસંસૃષ્ટિવ્યવસ્થાયાં ક્રિયમાણાયાં બહુપ્રભેદતા લક્ષ્યે દૃશ્યતે । તથાહિ સ્વપ્રભેદસઙ્કીર્ણઃ, સ્વપ્રભેદસંસૃષ્ટો ગુણીભૂતવ્યઙ્ગ્યસઙ્કીર્ણો ગુણીભૂતવ્યઙ્ગ્યસંસૃષ્ટો વાચ્યાલઙ્કારાન્તરસઙ્કીર્ણો વાચ્યાલઙ્કારાન્તરસંસૃષ્ટઃ સંસૃષ્ટાલઙ્કારસઙ્કીર્ણઃ સંસૃષ્ટાલઙ્કારસંસૃષ્ટશ્ચેતિ બહુધા ધ્વનિઃ પ્રકાશતે ।

તત્ર સ્વપ્રભેદસઙ્કીર્ણત્વં કદાચિદનુગ્રાહ્યાનુગ્રાહકભાવેન । યથા — "એવંવાદિનિ દેવર્ષૌ"ઇત્યાદૌ । અત્ર હ્યર્થશક્ત્યુદ્ભવાનુરણનરૂપવ્યઙ્ગ્ય-ધ્વનિપ્રભેદેનાલક્ષ્યક્રમવ્યઙ્ગ્યધ્વનિપ્રભેદોઽનુગૃહ્યમાણઃ પ્રતીયતે । એવં કદાચિત્પ્રભેદદ્વયસમ્પાતસન્દેહેન । યથા —

ક્ષણપ્રાઘુણિકા દેવર એષા જાયયા કિમપિ તે ભણિતા ।
રોદિતિ શૂન્યવલભીગૃહેઽનુનીયતાં વરાકી ॥

અત્ર હ્યનુનીયતામિત્યેતત્પદમર્થાન્તરસઙ્ક્રમિતવાચ્યત્વેન વિવ-ક્ષિતાન્યપરવાચ્યત્વેન ચ સમ્ભાવ્યતે । ન ચાન્યતરપક્ષનિર્ણયે પ્રમાણ-મસ્તિ । એકવ્યઞ્જકાનુપ્રવેશેન તુ વ્યઙ્ગ્યત્વમલક્ષ્યક્રમવ્યઙ્ગ્યસ્ય સ્વપ્રભેદાન્તરાપેક્ષયા બાહુલ્યેન સમ્ભવતિ । યથા —"સ્નિગ્ધશ્યામલ" ઇત્યાદૌ । સ્વપ્રભેદસંસૃષ્ટત્વં ચ યથા પૂર્વોદાહરણ એવ । અત્ર હ્યર્થાન્તર-સંક્રમિતવાચ્યસ્યાત્યન્તતિરસ્કૃતવાચ્યસ્ય ચ સંસર્ગઃ । ગુણીભૂતવ્યઙ્ગ્ય-સઙ્કીર્ણત્વં યથા —"ન્યક્કારો હ્યયમેવ મે યદરયઃ"ઇત્યાદૌ । યથા વા —

કર્તા દ્યૂતચ્છલાનાં જતુમયશરણોદ્દીપનઃ સોઽભિમાની
કૃષ્ણાકેશોત્તરીયવ્યપનયનપટુઃ પાણ્ડવા યસ્ય દાસાઃ ।
રાજા દુઃશાસનાદેર્ગુરુરનુજશતસ્યાઙ્ગરાજસ્ય મિત્રં
ક્વાસ્તે દુર્યોધનોઽસૌ કથયત ન રુષા દ્રષ્ટુમભ્યાગતૌ સ્વઃ ॥

અત્ર હ્યલક્ષ્યક્રમવ્યઙ્ગ્યસ્ય વાક્યાર્થીભૂતસ્ય વ્યઙ્ગ્યવિશિષ્ટવાચ્યા-ભિધાયિભિઃ પદૈઃ સમ્મિશ્રતા । અત એવ ચ પદાર્થાશ્રયત્વે ગુણીભૂતવ્ય-ઙ્ગ્યસ્ય વાક્યાર્થાશ્રયત્વે ચ ધ્વનેઃ સઙ્કીર્ણતાયામપિ ન વિરોધઃ સ્વપ્રભેદાન્તરવત્ । યથાહિ ધ્વનિપ્રભેદાન્તરાણિ પરસ્પરં સઙ્કીર્યન્તે પદાર્થવાક્યાર્થાશ્રયત્વેન ચ ન વિરુદ્ધાનિ ।

કિં ચૈકવ્યઙ્ગ્યાશ્રયત્વે તુ પ્રધાનગુણભાવો વિરુધ્યતે ન તુ વ્યઙ્ગ્ય-ભેદાપેક્ષયા, તતોઽપ્યસ્ય ન વિરોધઃ । અયં ચ સઙ્કરસંસૃષ્ટિવ્યવહારો બહૂનામેકત્ર વાચ્યવાચકભાવ ઇવ વ્યઙ્ગ્યવ્યઞ્જકભાવેઽપિ નિર્વિરોધ એવ મન્તવ્યઃ । યત્ર તુ પદાનિ કાનિચિદવિવક્ષિતવાચ્યાન્યનુરણનરૂપ-વ્યઙ્ગ્યવાચ્યાનિ વા તત્ર ધ્વનિગુણીભૂતવ્યઙ્ગ્યયોઃ સંસૃષ્ટત્વમ્ । યથા – "તેષાં ગોપવધૂવિલાસસુહૃદામ્"ઇત્યાદૌ । અત્ર હિ"વિલાસસુહૃદામ્" "રાધારહઃસાક્ષિણામ્"ઇત્યેતે પદે ધ્વનિપ્રભેદરૂપે"તે""જાને"ઇત્યેતે ચ પદે ગુણીભૂતવ્યઙ્ગ્યરૂપે ।

વાચ્યાલઙ્કારસઙ્કીર્ણત્વમલક્ષ્યક્રમવ્યઙ્ગ્યાપેક્ષયા રસવતિ

સાલઙ્કારે કાવ્યે સર્વત્ર સુવ્યવસ્થિતમ્ । પ્રભેદાન્તરાણામપિ કદાચિ-
ત્સઙ્કીર્ણત્વં ભવત્યેવ । યથા મમૈવ —
યા વ્યાપારવતી રસાન્ રસયિતું કાચિત્કવીનાં નવા
દૃષ્ટિર્યા પરિનિષ્ઠિતાર્થવિષયોન્મેષા ચ વૈપશ્ચિતી ।
તે દ્વે અપ્યવલમ્બ્ય વિશ્વમનિશં નિર્વર્ણયન્તો વયં
શ્રાન્તા નૈવ ચ લબ્ધમબ્ધિશયન ત્વદ્ભક્તિતુલ્યં સુખમ્ ॥

ઇત્યત્ર વિરોધાલઙ્કારેણાર્થાન્તરસંક્રમિતવાચ્યસ્ય ધ્વનિપ્રભેદસ્ય
સઙ્કીર્ણત્વમ્ ।
વાચ્યાલઙ્કારસંસૃષ્ટત્વં ચ પદાપેક્ષયૈવ । યત્ર હિ કાનિચિત્પદાનિ
વાચ્યાલઙ્કારભાઞ્જિ કાનિચિચ્ચ ધ્વનિપ્રભેદયુક્તાનિ । યથા —
દીર્ઘીકુર્વન્ પટુ મદકલં કૂજિતં સારસાનાં
પ્રત્યૂષેષુ સ્ફુટિતકમલામોદમૈત્રીકષાયઃ ।
યત્ર સ્ત્રીણાં હરતિ સુરતગ્લાનિમઙ્ગાનુકૂલઃ
સિપ્રાવાતઃ પ્રિયતમ ઇવ પ્રાર્થનાચાટુકારઃ ॥

અત્ર હિ મૈત્રીપદમવિવક્ષિતવાચ્યો ધ્વનિઃ । પદાન્તરેષ્વલઙ્કારાન્ત-
રાણિ ।
સંસૃષ્ટાલઙ્કારાન્તરસઙ્કીર્ણો ધ્વનિર્યથા —
દન્તક્ષતાનિ કરજૈશ્ચ વિપાટિતાનિ
પ્રોદ્ભિન્નસાન્દ્રપુલકે ભવતઃ શરીરે ।
દત્તાનિ રક્તમનસા મૃગરાજવધ્વા
જાતસ્પૃહૈર્મુનિભિરપ્યવલોકિતાનિ ॥

અત્ર હિ સમાસોક્તિસંસૃષ્ટેન વિરોધાલઙ્કારેણ સઙ્કીર્ણસ્યાલક્ષ્ય-
ક્રમવ્યઙ્ગ્યસ્ય ધ્વનેઃ પ્રકાશનમ્ । દયાવીરસ્ય પરમાર્થતો વાક્યાર્થી-
ભૂતત્વાત્ ।
સંસૃષ્ટાલઙ્કારસંસૃષ્ટત્વં ચ ધ્વનેર્યથા —
અભિનવપયોધરરસિતેષુ પથિકશ્યામાયિતેષુ દિવસેષુ ।
શોભતે પ્રસારિતગ્રીવાણાં નૃત્તં મયૂરવૃન્દાનામ્ ॥

અત્ર હ્યુપમારૂપકાભ્યાં શબ્દશક્ત્યુદ્ભવાનુરણનરૂપવ્યઙ્ગ્યસ્ય ધ્વનેઃ
સંસૃષ્ટત્વમ્ ।

એવં ધ્વનેઃ પ્રભેદાઃ પ્રભેદભેદાશ્ચ કેન શક્યન્તે ।

સઙ્ખ્યાતું દિઙ્માત્રં તેષામિદમુક્તમસ્માભિઃ ॥ ૪૪॥

અનન્તા હિ ધ્વનેઃ પ્રકારાઃ સહૃદયાનાં વ્યુત્પત્તયે તેષાં દિઙ્માત્રં કથિતમ્ ।

ઇત્યુક્તલક્ષણો યો ધ્વનિર્વિવેચ્યઃ પ્રયત્નતઃ સદ્ભિઃ
સત્કાવ્યં કર્તું વા જ્ઞાતું વા સમ્યગભિયુક્તૈઃ ॥ ૪૫॥

ઉક્તસ્વરૂપધ્વનિનિરૂપણનિપુણા હિ સત્કવયઃ સહૃદયાશ્ચ નિયતમેવ કાવ્યવિષયે પરાં પ્રકર્ષપદવીમાસાદયન્તિ ।

અસ્ફુટસ્ફુરિતં કાવ્યતત્ત્વમેતદ્યથોદિતમ્ ।
અશક્નુવદ્ભિર્વ્યાકર્તું રીતયઃ સમ્પ્રવર્તિતાઃ ॥ ૪૬॥

એતદ્ધ્વનિપ્રવર્તનેન નિર્ણીતં કાવ્યતત્ત્વમસ્ફુટસ્ફુરિતં સદશક્નુવદ્ભિઃ પ્રતિપાદયિતું વૈદર્ભી ગૌડી પાઞ્ચાલી ચેતિ રીતયઃ પ્રવર્તિતાઃ । રીતિલક્ષણવિધાયિનાં હિ કાવ્યતત્ત્વમેતદસ્ફુટતયા મનાક્સ્ફુરિતમાસીદિતિ લક્ષ્યતે તદત્ર સ્ફુટતયા સમ્પ્રદર્શિતેનાન્યેન રીતિલક્ષણેન ન કિઞ્ચિત્ ।

શબ્દતત્ત્વાશ્રયાઃ કાશ્ચિદર્થતત્ત્વયુજોઽપરાઃ ।
વૃત્તયોઽપિ પ્રકાશન્તે જ્ઞાતેઽસ્મિન્ કાવ્યલક્ષણે ॥ ૪૭॥

અસ્મિન્ વ્યઙ્ગ્યવ્યઞ્જકભાવવિવેચનમયે કાવ્યલક્ષણે જ્ઞાતે સતિ યાઃ કાશ્ચિત્પ્રસિદ્ધા ઉપનાગરિકાદ્યાઃ શબ્દતત્ત્વાશ્રયાઃ વૃત્તયો યાશ્ચાર્થતત્ત્વસમ્બદ્ધાઃ કૈશિક્યાદયસ્તાઃ સમ્યગ્રીતિપદવીમવતરન્તિ । અન્યથા તુ તાસામદૃષ્ટાર્થાનામિવ વૃત્તીનામશ્રદ્ધેયત્વમેવ સ્યાન્નાનુભવસિદ્ધત્વમ્ । એવં સ્ફુટતયૈવ લક્ષણીયં સ્વરૂપમસ્ય ધ્વનેઃ । યત્ર શબ્દાનામર્થાનાં ચ કેષાઞ્ચિત્પ્રતિપત્તૃવિશેષસંવેદ્યં જાત્યત્વમિવ રત્નવિશેષાણાં ચારુત્વમનાખ્યેયમવભાસતે કાવ્યે તત્ર ધ્વનિવ્યવહાર ઇતિ યલ્લક્ષણં ધ્વનેરુચ્યતે કેનચિત્તદયુક્તમિતિ નાભિધેયતામર્હતિ । યતઃ શબ્દાનાં સ્વરૂપાશ્રયસ્તાવદક્લિષ્ટત્વે સત્યપ્રયુક્તપ્રયોગઃ । વાચકાશ્રયસ્તુ પ્રસાદો વ્યઞ્જકત્વં ચેતિ વિશેષઃ । અર્થાનાં ચ સ્ફુટત્વેનાવભાસનં વ્યઙ્ગ્યપરત્વં વ્યઙ્ગ્યાંશવિશિષ્ટત્વમ્ ચેતિ વિશેષઃ ।
તૌ ચ વિશેષૌ વ્યાખ્યાતું શક્યેતે વ્યાખ્યાતૌ ચ બહુપ્રકારમ્ ।
તદ્વ્યતિરિક્તાનાખ્યેયવિશેષસમ્ભાવના તુ વિવેકાવસાદભાવમૂલૈવ । યસ્માદનાખ્યેયત્વં સર્વશબ્દાગોચરત્વેન ન કસ્યચિત્સમ્ભવતિ । અન્તતોઽના-

ખ્યેયશબ્દેન તસ્યાભિધાનસમ્ભવાત્ । સામાન્યસંસ્પર્શિવિકલ્પશબ્દા-
ગોચરત્વે સતિ, પ્રકાશમાનત્વં તુ યદનાખ્યેયત્વમુચ્યતે ક્વચિત્
તદપિ કાવ્યવિશેષાણાં રત્નવિશેષાણામિવ ન સમ્ભવતિ । તેષાં
લક્ષણકારૈર્વ્યાકૃતરૂપત્વાત્ । રત્નવિશેષાણાં ચ સામાન્યસમ્ભાવનયૈવ
મૂલ્યસ્થિતિપરિકલ્પનાદર્શનાચ્ચ । ઉભયેષામપિ તેષાં પ્રતિપત્તૃવિશેષસંવે-
દ્યત્વમસ્ત્યેવ । વૈકટિકા એવ હિ રત્નતત્ત્વવિદઃ, સહૃદયા એવ હિ
કાવ્યાનાં રસજ્ઞા ઇતિ કસ્યાત્ર વિપ્રતિપત્તિઃ ।
યત્ત્વનિર્દેશ્યત્વં સર્વલક્ષણવિષયં બૌદ્ધાનાં પ્રસિદ્ધં તત્તન્મતપરીક્ષાયાં
ગ્રન્થાન્તરે નિરૂપયિષ્યામઃ । ઇહ તુ ગ્રન્થાન્તરશ્રવણલવપ્રકાશનં સહૃદય-
વૈમનસ્યપ્રદાયીતિ ન પ્રક્રિયતે । બૌદ્ધમતેન વા યથા પ્રત્યક્ષાદિલક્ષણં
તથાસ્માકં ધ્વનિલક્ષણં ભવિષ્યતિ । તસ્માલ્લક્ષણાન્તરસ્યાઘટનાદશબ્દા-
ર્થત્વાચ્ચ તસ્યોક્તમેવ ધ્વનિલક્ષણં સાધીયઃ । તદિદમુક્તમ્ —
અનાખ્યેયાંશભાસિત્વં નિર્વાચ્યાર્થતયા ધ્વનેઃ ।
ન લક્ષણં, લક્ષણં તુ સાધીયોઽસ્ય યથોદિતમ્ ॥

ઇતિ શ્રીરાજાનકાનન્દવર્ધનાચાર્યવિરચિતે ધ્વન્યાલોકે તૃતીયઃ ઉદ્યોતઃ ॥

Encoded by Rajani Arjun Shankar

*Dhvanyalokah Udyotah 3*

pdf was typeset on October 7, 2024

Please send corrections to *sanskrit@cheerful.com*